# 'आरण्यक'स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते । वर्षारम्भः चैत्रात् (मार्च तः) मन्यते ।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते । मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते । तादृशाय ग्राहकाय बर्षस्य पूर्वप्रकाशितोऽङ्कः उपलब्धौ सत्यां प्रेषयिष्यते ।
3. वार्षिकं शुल्कं त्रिंशत् (३०) रूप्यकाणि, तथा च एकस्याङ्कस्य पञ्चदश रूप्यकाणि वर्तते । शुल्कं धनादेश/ड्राफ्टमुखेन प्रेषणीयम् ।
4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिकनिबन्धाः प्रकाशनाय गृह्यन्ते ।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते ।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किताः वा स्युः । रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम् ।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम् ।
8. अस्वीकृता लेखा निर्धारित 'स्टाम्प'-प्राप्त्यनन्तरं प्रत्यावर्तयितुं शक्याः ।
9. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते ।
10. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः ।
11. पत्रसम्बद्धः सर्वविधपत्रव्यवहारः धनादेशद्वारा शुल्कप्रेषणञ्च **डा० गोपबन्धु मिश्रः, सम्पादकः, आरण्यकम्, मारुतिमन्दिरम्, प्रकाशपुरी, आरा ( विहारः )-802301** इति सङ्केतेन विधेयम् ।

❖

# आरण्यकम्

## संस्कृतप्रसारपरिषदः अर्धवार्षिकं शोधपत्रम्


वर्षम् – अष्टमम् अङ्कः – प्रथमः

चैत्रः, वि० सं० २०५८

मार्च, २००१



प्रतिवर्षं प्रकाशनकालः
चैत्रः, अश्विनः-विक्रमाब्दः
मार्च, सितम्बर

प्रत्यङ्कम् - १५ रूप्यकाणि वार्षिकं शुल्कं ३० रूप्यकाणि

## परामर्शदात्री समितिः


पण्डित वासुदेव द्विवेदी, वाराणसी
डॉ० सुरेशचन्द्र गो० काण्टावाला, बड़ोदरा
डॉ० हरिहर झा, दरभङ्गा
डॉ० उमाशङ्कर शर्मा 'ऋषि:', पटना
डॉ० भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ० राय अश्विनी कुमारः, बोधगया

*प्रधानसम्पादकः*

पण्डित व्रजभूषण मिश्र 'आक्रान्तः'

*सम्पादकः*

डॉ० गोपबन्धु मिश्रः



*प्रकाशिका*

संस्कृतप्रसारपरिषद्

मारुतिमन्दिरम्

प्रकाशपुरी, आरा (विहारः) 802301

संस्कृतप्रसारपरिषद् आरा पक्षतः डॉ० गोपबन्धु मिश्रेण, आरा प्रिन्टर्स, गोला मुहल्ला, आरा, बिहार-802301 इत्याख्ये मुद्राणालये मुद्रितं प्रकाशितं च ।

डॉ० गोपबन्धु मिश्रः
सम्पादकः


# सूचीपत्रम्


| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| सम्पादकीयम् | | |
| 1. मृच्छकटिकप्रकरणे हास्ययोगः | डॉ० प्रकाश चन्द्र यादवः टी. एन. बी., भागलपुर विश्वविद्यालयः, भागलपुरम् | १ |
| 2. उपनिषदः अलङ्कारशास्त्रञ्च | डॉ. एन्. के. सुन्दरेश्वरन् व्याख्याता, साहित्यविभागः श्रीशङ्कराचार्यसंस्कृत-विश्वविद्यालयः, कलाडी (केरल) | ५ |
| 3. संस्कृतप्रसारपरिषद्, आरा संक्षिप्तम् इतिवृत्तम् | | १४ |
| 4. शास्त्रेषु जलतत्त्वम् | मनीष कुमार सिंहः शोधच्छात्रः, संस्कृतविभागः, पटना विश्वविद्यालयः, पटना | १५ |
| 5. प्रतिध्वनिः (पुस्तकसमीक्षा) | रचयिता-डॉ. रवीन्द्र कुमार पण्डा समीक्षकः-श्री सुनील कुमार प्रधानः | १८ |
| 6. वेदपुराणयोः पुनर्जन्मसिद्धान्तः | डॉ० धर्मेन्द्र कुमार सिंहदेवः व्याख्याता, संस्कृतविभागः डॉ० हरिहर सिंह गौर विश्वविद्यालयः, सागरम् (म. प्र.) | १९ |
| 7. धर्मस्य तत्त्वं निहितं गुहायाम् | पूनम शर्मा शोधच्छात्रा, दर्शनशास्त्रविभागः पटना विश्वविद्यालयः, पटना | २९ |

8. 'मतुप्'प्रत्ययस्य भाषाशास्त्रीयम् अध्ययनम् — डॉ० लक्ष्मीश्वर झा, आचार्यः, संस्कृतविभागः, आर. डी. एण्ड डी. जे. स्नातकोत्तरमहाविद्यालयः, मुंगेर (विहारः) — ३१

9. योगवासिष्ठस्योत्पत्तिप्रकरणे 'मनः' — प्रतिमा परमारः, शोधच्छात्रा, संस्कृतविभागः, वी. कु. सिंह विश्वविद्यालयः, आरा (विहारः) — ४१

10. 'विद्या'भेदविमर्शः — डॉ० श्रीधर मिश्रः, व्याख्याता, संस्कृतविभागः, दीन'दयाल उपाध्याय गोरखपुर विश्वविद्यालयः, गोरखपुर (उ. प्र.) — ४५

11. वनवल्ली (पुस्तकसमीक्षा) — रचयिता-डॉ. रवीन्द्र कुमार पण्डा, समीक्षकः-श्री सुनील कुमार प्रधानः — ५०


❖ ❖ ❖

# सम्पादकीयम्

संवादः विवादः विसंवादश्च इति शब्दाः ध्वनिदृष्ट्या केवलं सम्-वि-विसम् इति उपसर्गविशेषाणां सान्निध्यं द्योतयन्ति परन्तु अर्थप्रतीतिप्रसङ्गे एतेषु पार्थक्यं सुतरां दृश्यते । इदानीं राष्ट्रीयशिक्षानीतौ संस्कृतभाषायाः ज्योतिर्विज्ञानस्य वैदिकगणितस्य वा स्थितेः विषये एतत् पार्थक्यं सम्यगनुभवितुं शक्यते ।

'संस्कृतं' न केवलमेका सामान्या भाषा, अपि तु भारतीयसंस्कृतेरियं प्राणस्वरूपा । एतस्याः भाषायाः अध्ययनेन भारते धर्मनिरपेक्षतायाः हानिः कदापि न भवति, अपरं तु एषा एव भारते साम्प्रदायिकसद्भावं सुतरां स्थापयितुं शक्या । एषा धर्मविशेषस्य वर्गविशेषस्य वा भाषा नास्ति, अपि तु राष्ट्रियायाः संहतेः प्रतिष्ठायाश्च कृते अतीव अनिवार्याऽस्ति इति संवादः बहुभिः मनीषिभिः विविधेषु अवसरेषु कथितः लिखितः विमृष्टश्चास्ति । ४ अक्टूबर ९४ दिनाङ्के भारतस्य माननीयसर्वोच्चन्यायालयेन एष एव संवादः बहुभिः प्रमाणैः सुस्पष्टं कृत आसीत् । अद्यापि नैकैः राजनीतिज्ञैः शिक्षाविद्भिः वैज्ञानिकैश्च एतस्याः भाषायाः सामाजिक-सांस्कृतिक-वैज्ञानिकादिदृष्टिभिः महत्त्वं सम्यक् उद्यमानमस्ति ।

एन्. सी. ई. आर. टी. द्वारा राष्ट्रीयशिक्षानीतौ आवश्यकीयं संशोधनमुद्दिश्य विशेषज्ञानां परामर्शेन यः प्रस्तावः आनीतः, किं च यू. जी. सी. द्वारा राष्ट्रीयचेतनायाः जागरणमभिलक्ष्य विश्वविद्यालयेषु वैदिकगणित- ज्योतिष-कर्मकाण्डादिविषयान् ऐच्छिकविषयरूपेण पाठयितुं यः प्रसङ्गः समानीतः, तेन कारणेन कैश्चित् तथाकथितैः प्रगतिवादिभिः 'विवादः' प्रारब्धः । तेषां मतेन एतादृशं संशोधनं न केवलं राजनीत्या प्रेरितम्, अपि तु शिक्षायाः 'भगवाकरणं' विधातुमेव एतद् उद्दिष्टमस्ति । एषः विवादः बहुषु समाचारमाध्यमेषु बहुधा प्रसारितोऽपि जातः ।

विवादमिममाश्रित्य न केवलम् एन्. सी. ई. आर. टी., यू. जी. सी. द्वारा अपि तु अनेकैः राष्ट्रचिन्तकैः पूर्वम् उल्लिखितस्य संवादस्य आधारेण राष्ट्रीयम् उद्देश्यं किं, तत्र च संस्कृतभाषायाः संस्कृतविद्यायाश्च महत्त्वं किमिति बहुधा स्पष्टीकृतम् ।

इदानीं विवदमानाः ते तथाकथिताः प्रगतिवादिनः 'विसंवादं' प्रारभमाणाः दृश्यन्ते । तेषां मतेन आर्याः न केवलं बहिरागताः अपि तु मूलतः ते असभ्याः गोमांसभक्षिणः तथाकथितजातिवादपरायणाः, सामाजिकन्यायविरोधिनः आसन् इति ये वदन्ति अथवा लिखन्ति ते एव सत्यवादिनः प्रगतिवादिनश्च सन्ति । ये मनीषिणः वैदिकं ज्ञानं ज्योतिर्विज्ञानं प्राच्यविद्यां संस्कृतभाषां, तन्निहितां वैज्ञानिकतां च प्रशंसन्ति ते सर्वे साम्प्रदायिकाः रूढिवादिनः, 'भगवा'वर्णभक्ताः इति । एतादृशाः स्वयंभुवः 'प्रगतिवादिनः' सादरं प्रार्थ्यन्ते यत् ते मूलं संवादं जानन्तु । जानन्ति चेत् तद् अवगच्छन्तु । अवगच्छन्ति चेत् तदेव वदन्तु । अन्यथा तेषामातङ्केन गतेषु पञ्चाशदुत्तरेषु वर्षेषु त्रस्ता कुण्ठिता च राष्ट्रीया शिक्षा यदिदानीं स्वावलम्बिनी भवितुकामा दृश्यते, सा पुनरेकवारं दुर्बला सङ्कीर्णा च भविष्यति ।

'आरण्यकम्' इदं राष्ट्रीयशिक्षायां संस्कृतविद्यायाः पक्षान् उररीकर्तुं यथाशक्ति प्रवर्त्तमानं स्यादिति विद्वांसः चिन्तकाः एवात्र प्रमाणम् ।

*विद्वदवनतः*

**गोपबन्धु मिश्रः**

सम्पादकः

आरण्यकस्य

मार्च 2001

# 'मृच्छकटिक'प्रकरणे हास्ययोगः

*डॉ० प्रकाश चन्द्र यादवः*

हास्यस्य स्थानं नाटकं विहायान्यविधेषु काव्येषु स्वल्पमेव स्वीक्रियते । न तेषु काव्यानुरोधेन हास्यपरायणो विदूषको विलसति, अन्ये वा हास्यकारका नायका विधीयन्ते । नाटकानां मनोरञ्जनस्य च हास्यस्यैव परं निधानत्वात् कवयो विविधोपायैस्तत्र हास्यं सृजन्ति । अस्थानेऽकालेऽज्ञानवशाद्वा यत् कृतं प्रोक्तं, धृतं वा तद् हास्यकारणं भवति। विदूषकस्तु तादृशीषु प्रवृत्तिषु परं निष्णातो बहुषु नाटकेषु परिचित एव। तं विहाय येऽन्ये नायका हास्यसर्जनाय विनियुज्यन्ते तानेवात्राधिकृत्य समीक्षामहे। प्रायशः नाटककविः कथागतिं बाधमानमपि हास्यकरं विवरणं सप्रपञ्चं प्रस्तौतीति नाटकेषु दृश्यते।

तद्यथा मृच्छकटिके तृतीयेऽङ्के शर्विलकस्य चौर्यप्रक्रिया–

'मापयित्वा कर्म समारभे । (तथा कृत्वावलोक्य च) एकलोष्टा–वशेषोऽयं सन्धिः। धिक् कष्टम्, अहिना दष्टोऽस्मि । (यज्ञोपवीतेना–ङ्गुलीं बद्ध्वा विषवेगं नाटयति। चिकित्सां कृत्वा) स्वस्थोऽस्मि ।'

शकारीयहास्यस्य परं निधानं तु मृच्छकटिकमेव राजते । शकारस्य ग्राम्यभाषा, ग्राम्यविचारसरणिरुद्दण्डोचितकार्यपद्धतिश्च प्रेक्षकान् हासयन्ति। प्रकरणेऽस्मिन् कविः शकारस्य मौर्ख्यपरं हास्यं भृशं साधयति।

मृच्छकटिकेऽयं शकारो हास्यनिर्झरीं सातिशयं प्रस्तौति । तद्यथा तस्यासमंजसितापार्थकानि वचांसि–

मम वशमनुयाता रावणस्येव कुन्ती ।[1]
किं द्रौपदीव पलायसे रामभीता ?[2]
केशवृन्दे परामृष्टा चाणक्येनेव द्रौपदी ।।[3]

**अप्रासङ्गिकवाक्यव्यवहारेण** हास्यं सृजति शकारः ।

तद्यथाष्टमेऽङ्के– "एतन्मम भगिनीपतिना सर्वोद्यानानां प्रवरं पुष्पकरण्डोद्यानं दत्तं, यत्र तावच्छुनकाः श्रृगालाः पानीयं पिबन्ति । अहमपि प्रवरपुरुषो मनुष्यको न स्नामि ।"

**ऐतिहासिकतथ्यानां व्यत्ययोऽपि** शकारवचनेषु हास्यकारी भवति ।

तद्यथा–

चाणक्येन यथा सीता मारिता भारते युगे ।
एवं त्वां मोटयिष्यामि जटायुरिव द्रौपदीम् ।।[4]

शकारीयहास्यं न केवलं वचनवैपरीत्येनापि तु कार्य–विधिवैपरीत्येनापि सम्भवति । मृच्छकटिकस्य प्रथमेऽङ्के स चेटदत्तमसिं विपरीतं गृह्णाति ।

**कार्य-व्यत्ययव्यवहारेणापि** हास्यं जायते । अष्टमेऽङ्के शकारश्चेटं कथयति–"तद्यदि राक्षसी तदोभावपि मुषितौ । अथ चौरः तदोभावपि खादितौ ।" तत्रैव पुनः शकारो वदति–कथं श्रृगाला उड्डीयन्ते। वायसा व्रजन्ति । तद्यावद्भावोऽक्षिभ्यां भक्ष्यते, दन्तैः प्रेक्ष्यते, तावदहं पलायिष्ये ।"

अष्टमेऽङ्के शकारोऽकारणमेव भिक्षुं ताडयति कथयति च–"तत्किमर्थं त्वं जातमात्र एव न प्रव्रजित इति ।" वयस्कानां हास्यं मा भवेदत्र, किन्तु बालानां तु भवत्येव ।

मृच्छकटिकस्याष्टमेऽङ्के शकारो मिथ्याभियोगेन हासयति । स्वयं वसन्तसेनां मारयित्वा पापेभ्य आत्मानं रक्षितुं स यत्र–यत्र मिथ्या प्रपञ्चयति, तत्र–तत्र प्रेक्षकाणां हास उत्पद्यते । तद्यथा–

शकारः–(विटं प्रति) अरे वसन्तसेनां स्वयमेव मारयित्वा मां दूषयित्वा कुत्र पलायसे ?[5]

**द्यूतकराणां व्यावसायिकी विशेषभाषा** प्रेक्षकान् हासयत्येव। तद्यथा मृच्छकटिके–

नवबन्धनमुक्तयेव गर्दभ्या हा ताडितोऽस्मि गर्दभ्या ।।[6]

अत्र 'गर्दभ्या ताडितोऽस्मि' इति द्यूतकराणां बोधनीया भाषा । गर्दभी तु वराटिका नाम । गर्दभी पशुविशेष एवेति प्रेक्षका जानन्ति ।



शर्विलकस्य चोरोचितनमस्कारा हास्याय सन्ति । तद्यथा–

"नमो वरदाय कुमारकार्त्तिकेयाय, नमः कनकशक्तये ब्रह्मण्येदेवाय देवव्रताय, नमो भास्करनन्दिने, नमो योगाचार्याय, यस्याहं प्रथमशिष्यः।"

कुत्रचिद् **युक्तियुक्तप्रलापेन** कविर्नाटके हास्यं जनयति । मृच्छकटिके दर्दुरक एवं वदति–

द्रव्यं लब्धं द्यूतेनैव दारा मित्रं द्यूतेनैव ।
दत्तं मुक्तं द्यूतेनैव सर्वं नष्टं द्यूतेनैव ।।[7]

शकारस्यानर्गलप्रलापस्तु कुकविता–सम्मिश्रो भृशं हासयति ।

तद्यथा–

विटः – किमुच्यते । गन्धर्वो भवान् ।
शकारः– कथं गन्धर्वो न भविष्यामि ।
हिंगूज्ज्वला जीरकभद्रमुस्ता
वचाया ग्रन्थिः सगुडा च शुण्ठी ।
एषा मया सेविता गन्धयुक्तिः
कथं नाहं मधुरस्वर इति ।।[8]

क्वचन नाम्नैव हास्यं जन्यते । तद्यथा मृच्छकटिके द्वितीयेऽङ्के दर्दुरक इति नाम । दर्दुरस्तु मण्डूकः । इदं पात्रमात्मानं प्रस्तावयति–

धूर्तस्य माथुरस्य दुराग्रहं श्रुत्वा नन्वयं दर्दुरो मोचयति (संवाहकम्)। पञ्चमाङ्के चेटस्य कुम्भीलक इति नाम हास्यार्थं प्रयुक्तम्। मृच्छकटिकस्याष्टमेऽङ्के विटो वृद्धशृगाल इति शकारेणभिहितः ।

**केवलमात्मविकत्थनेन** हास्यं जायते । तद्यथा शकारो विटं प्रति मृच्छकटिकस्याष्टमेऽङ्के वदति–'भाव, भाव मां प्रवरपुरुषं मनुष्यं वासुदेवकम्' इति । दशमेऽङ्के शकार आत्मानं विकत्थते–

'नहि रत्नकुम्भसदृशोऽहं स्त्रियं व्यापादयामि ।' सामाजिकाः शकारस्य हीनचरित्रं जानन्ति । यदा स आत्मानं रत्नकुम्भसदृशं विशेषयति, तदा प्रेक्षका हसन्त्येव ।

हास्यप्रधानेषु नाटकेषु प्रारम्भत एव हास्यप्रवृत्तिः सूत्र–धारनटीवचनेष्वपि भूयः प्रचरति । तद्यथा मृच्छकटिके मिथ्याभाषणेन–

सूत्रधारः–किमस्माकं गेहे सर्वमस्ति अथवा परिहससि ।

नटी–(स्वगत) परिहसिष्यामि तावत् । (प्रकाशम्) आर्य ! अस्ति आपणे ।

अष्टमेऽङ्के भिक्षुः शकारमाक्रोशति । शकारो विटं पृच्छति–.....किं भणति ।

विटः– स्तौति भवन्तम् ।

शकारः– स्तुहि, स्तुहि, पुनरपि स्तुहि ।

यदि नाम किमपि वृत्तं पात्रेणाज्ञातं भवति सामाजिकैश्च ज्ञातं भवति तदा तत् पात्रमज्ञानवशाच्छुद्धभावेनायुक्तं वदेत्तर्हि तस्यायुक्त–भाषणस्य कारणं विदानाः प्रेक्षका हसन्त्येव । पात्रस्य शुद्धभावस्तत्र हास्यं वर्धयति । तद्यथा मृच्छकटिके प्रेक्षकाश्चतुर्थेऽङ्के विज्ञापिताः सन्ति यद् वसन्तसेनायै तस्या अलंकाराश्चोरेणोपनीताः । तत्रैव विदूषकस्तस्याः पुरतोऽसत्यं वदति यच्चारुदत्तेनालङ्कारा द्यूते हारिताः । अनेनासत्येन विदूषकस्य शुद्धभावेन च प्रेक्षका हसन्त्येव ।

मृच्छकटिके **शकारस्य कुकाव्यं** प्रेक्षकान् हासयति ।

तद्यथा– बहुकुसुमविचित्रता च भूमिः<br>
कुसुमभरेण विनामिताश्च वृक्षाः ।<br>
द्रुमशिखरलतावलम्बमानाः<br>
पनसफलानीव वानरा ललन्ति ।।[9]

## सन्दर्भसूची


मृच्छकटिकम्–व्याख्याकारः तारिणीश झा

1. मृच्छकटिकम् 1/21
2. मृच्छकटिकम् 1/25
3. मृच्छकटिकम् 1/47
4. मृच्छकटिकम् 8/35
5. मृच्छकटिकस्य प्रथमेऽङ्के ।
6. मृच्छकटिकम् 2/1
7. मृच्छकटिकम् 2/8
8. मृच्छकटिकम् 8/13
9. मृच्छकटिकम् 8/8


❖ ❖ ❖



# उपनिषदः अलङ्कारशास्त्रञ्च

डॉ० एन० के० सुन्दरेश्वरन्

सनातनस्य धर्मस्य मूलत्वेनाम्नाता वेदा अनन्ता अपौरुषेयाश्चेति सम्प्रदायः। "इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः" इति वेदार्थचिन्तकानां पथिकृत्सायणाचार्यः वेदानां श्रेयःसाधनतां स्फोरयति। तादृशानां वेदानां सारतमो भाग एव उपनिषच्छब्देन व्यवह्रियत इत्येतन्नाविदितं विदितवेदितव्यानाम्। ताश्चोपनिषदः संसारमूला–विद्यावसादनीं ब्रह्मविद्यामाचक्षते। तत्प्रतिपाद्यं च ब्रह्म वाङ्मनसोरगोचरं सर्वातीतमपि सर्वगतं सर्वान्तर्यामि चेति बहुशो विवृतं परमकरुणामय्या श्रुतिमात्रा। अवाङ्मनसगोचरं तद् ब्रह्मतत्त्वं वचोभिरेव वेदयितुं प्रवृत्ता उपनिषदः बाह्यैश्चान्तरैरलङ्कारैरलङ्कृततया सुन्दरवाङ्मयतामापद्यन्ते। तेन अलङ्कारशास्त्रदृशा उपनिषदगिरां समीक्षणं नानुचितं नाप्रयोजनं च।

विश्वप्रतिष्ठाहेतुः लोकव्यवहारसाधनीभूता च भगवती भारती शास्त्ररूपेण काव्यरूपेण चात्मानं द्विधा दर्शयन्ती आत्मनो द्वैरूप्यं विधत्ते। तत्र उभयोरेतयोः भारतीतन्वोः पुमर्थसाधनत्वे अज्ञातार्थज्ञापकत्वे च समानेऽपि काव्यस्यास्त्येव किञ्चिद्वैशिष्ट्यम् । शास्त्रसन्दर्भः दुःश्रवदुर्भणदुरधिगमत्वादिदोषवत्त्वादध्ययनावसरे दुःसहदुःखदायी। कविताकामिनी तु कान्तासम्मितं ज्ञेयं बोधयन्ती अध्ययनावसर एव परममाह्लादं दोग्धि। तदुक्तं कुन्तकेन–

**"कटुकौषधवच्छास्त्रमविद्याव्याधिनाशनम्।<br>
आह्लाद्यमृतवत्काव्यमविवेकगदापहम्।<br>
आयात्यं च तदात्वे च रसनिष्यन्दसुन्दरम्।"**[1]

इदमेव सरस्वतीहृदयारविन्दमकरन्दबिन्दुसन्दोहसुन्दरं काव्यं साहित्यमित्यपि व्यपदिश्यते।

किं वा तत्त्वं काव्यस्य काव्यत्वाधायकमिति चिन्ता चिरकालात् प्रवृत्ता काव्यशास्त्रविदां कुले। प्राञ्चः केचिदलङ्कारं काव्यात्मानं मेनिरे। केचनापरे गुणं काव्यात्मानमाचक्षिरे। एवमेव बहुभिर्बहुधा प्रस्तुतत्वात् काव्यशास्त्रवर्त्मनि अष्टौ प्रस्थानानि प्रवृत्तानि। तेषु अलङ्कारप्रस्थानस्य प्राचीनतमत्वात् चिरकालं काव्यशास्त्रम् अलङ्कारशास्त्रमिति व्यपदिष्टमासीदभियुक्तैः। स च व्यपदेशः अद्यापि सन्नलङ्काराणां प्राधान्यमुद्बोधयति। अलङ्कारशब्दो द्विधा निष्पाद्यते। अलं पर्याप्तं करोतीति; अलङ्क्रियतेऽनेनेति च। प्रथमस्मिन् पक्षे येन विना काव्यमकाव्यं स्याद् यद्वा काव्यस्य तत्त्वमादधाति तदेवालङ्कारशब्दवाच्यम्। अर्थात् काव्यस्यान्तरं किञ्चन तत्त्वं भवत्यलङ्कारः।

**"काव्यं ग्राह्यमलङ्कारात्। सौन्दर्यमलङ्कारः।[2]"** इति सूत्रयन् वामनः, तथा **"सालङ्कारस्य काव्यता।[3]"** इति काव्यसामान्यलक्षणं वदन् कुन्तकश्च एतत्पक्षावलम्बिनौ।

**"तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः।**
**अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत्।[4]"**

इति वदन्नानन्दवर्धनाचार्यः तन्मतानुसारिणश्च द्वितीयं निष्पत्तिपक्षमाद्रियन्ते। तेषां मते अलङ्काराः काव्यस्य नान्तरा धर्माः। अपि तु बाह्याः यैर्विनापि काव्यं विराजेत। केवलं ते काव्यशोभातिशयहेतव एव।

काव्यस्य काव्यत्वाधायकः अन्तरालङ्कार एव ध्वनिरिति वक्रोक्तिरिति औचित्यमित्यादि च बहुभिः काव्यतत्त्वविद्भिर्बहुधोल्लिखितः। श्रुत्युत्तमाङ्गभूतासु उपनिषत्सु बाह्या आन्तराश्चालङ्काराः कथङ्कारं सन्निविष्टा इति किञ्चिदिव यथाशक्ति विचारयामः।

यद्यपि वेदानाम् अप्रतर्क्यत्वात् अचोद्यप्रवर्तनारूपशासन– प्रधानत्वाच्च प्रायः आलङ्कारिकैः प्रभुसम्मितत्वमाम्नातं तथापि



तदङ्गभूतानामुपनिषदां कान्तासम्मितत्वं बाह्याभ्यन्तरालङ्कार– सौन्दर्यवशात्तत्र तत्र सुदर्शमेव। तच्च सुधीभिर्विचारधुरीणैस्तत्र तत्र उद्घुष्टमपि। एतदेव मनसि निधाय काव्यमीमांसाकारो राजशेखरः साहित्यशास्त्रस्य वेदाङ्गत्वं साधयन्नेवमाह–

"उपकारकत्वादलङ्कारः सप्तममङ्गम् इति यायावरीयः। ऋते च तत्स्वरूपरिज्ञानाद्वेदार्थानवगतिः। यथा –

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति।।[5]"

रसगङ्गाधरकारोऽपि अतिशयोक्त्यलङ्कारं लक्षयित्वा अमुमेव उपनिषन्मन्त्रमुद्धरन्नेवमुदाहरति। "इयं चातिशयोक्तिर्वेदेऽपि दृश्यते"[6] इति। एवम् अर्वाचीना अपि चिन्तकाः उपनिषदः उत्तमकाव्यत्वेन उदाहरन्ति।

उपनिषत्सु बहवो बाह्यालङ्कारा दरीदृश्यन्ते।

"अनेजदेकं मनसो जवीयो
नैतद्देवा आप्नुवन् पूर्वमर्षत्।
तद्धावतोऽन्यानत्येति तिष्ठन्
तस्मिन्नपो मातरिश्वा दधाति।"

[ईशावास्योपनिषत्–4]

तदेजति तन्नैजति तद्दूरे तद्वन्तिके।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः।।

[ईशावास्योपनिषत्–5]

अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितम्मन्यमानाः।
दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथाऽन्धाः।।

[कठोपनिषत्–II/5]

इत्येतेषु उपनिषन्मन्त्रेषु वर्णावृत्तिरूपोऽनुप्रासः सुदर्श एव। अर्थालङ्कारेषु उपमा रूपकं च भूयसा दृश्येते। अपरेऽप्यलङ्काराः

सन्त्येव। विस्तरभिया केचनैवात्र उदाह्रियन्ते। अर्थालङ्कारेषु प्रधान उपमालङ्कारः बहुषु उपनिषन्मन्त्रेषु प्रयुक्तो दृश्यते।

स यथा–

''यथा नद्यः स्यन्दमानाः समुद्रेऽ–
स्तं गच्छन्ति नामरूपे विहाय।
तथा विद्वान्नामरूपाद्विमुक्तः
परात्परं पुरुषमुपैति दिव्यम्।।

[मुण्डकोपनिषत्–III–2–8]

सूर्यो यथा सर्वलोकस्य चक्षु–
र्न लिप्यते चाक्षुषैर्बाह्यदोषैः।
एकस्तथा सर्वभूतान्तरात्मा
न लिप्यते लोकदुःखेन बाह्यः।।

[कठोपनिषत्–V–1]

यथोर्णनाभिः सृजते गृह्णते च
यथा पृथिव्यामोषधयः संभवन्ति।
यथा सतः पुरुषात्केशलोमानि
तथाऽक्षरात्सम्भवतीह विश्वम्।।

[मुण्डकोपनिषत्–I–7]

इत्येतेषु मन्त्रेषु तुरीयस्य ब्रह्मणः शब्दानभिधेयत्वात् भगवती श्रुतिः लक्षणयैव तद्विषयीकरोति। तत्त्वमस्यादिवाक्यार्थबुभुत्सूनां उपनिषत्तत्त्वविविदिषूणाञ्च नाविदितमेतत्। तेन च अर्थालङ्कारेषु गौणसारोपलक्षणारूपं रूपकालङ्कारं बहु उपयुञ्जन्त्युपनिषदः। तद्यथा–

''आत्मानं रथिनं विद्धि शरीरं रथमेव तु
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च।



**इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्।**
**आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः।।**

[कठोपनिषत्–III/2–3]

**क्षुरस्य धारा निशिता दुरत्यया**
**दुर्गं पथस्तत्कवयो वदन्ति ।**

[कठोपनिषत्–III/14]

इत्याद्याः कठोपनिषन्मन्त्राः तथा–

**धनुर्गृहीत्वौपनिषदं महास्त्रं**
**शरं ह्युपासानिशितं सन्दधीत ।**
**आयम्य तद्भावगतेन चेतसा**
**लक्ष्यं तदेवाक्षरं सोम्य विद्धि ॥**
**प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ।**
**अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥**

[मुण्डकोपनिषत्–II–2–3,4]

इत्याद्या मुण्डकोपनिषन्मन्त्राश्च सुन्दरेण रूपकालङ्कारेणो–पस्कृताश्चकासति।

पूर्वोदाहृते 'अनेजदेकं मनसो जवीयो'......................

इत्यस्मिन्मन्त्रे न केवलमनुप्रासोऽलङ्कारः

**''विरोधः सोऽविरोधोऽपि विरुद्धत्वेन यद्वचः''**[7] इति लक्षितो विरोधाऽलङ्कारोऽप्यस्ति। मन्त्रस्यास्य व्याख्याने शङ्कराचार्यः एतमेवं सूचयति।

**''कथं विरुद्धमुच्यते । ध्रुवं निश्चलमिदं मनसो जवीय इति। नैष दोषः । निरुपाध्युपाधिमत्त्वेन उपपत्तेः''**[8] इति। अनन्तरेऽपि मन्त्रे [तदेजति.......] विरोधालङ्कारः स्फुटमुद्भासते।

श्वेताश्वतरोपनिषदि चतुर्थाध्यायगताः सर्वेऽपि मन्त्राः प्रायः परब्रह्मणः महिमानमुद्घुष्यन्तः सन्ति। तेनैव ते सर्वे

"उदात्तं वस्तुनः सम्पन्महतां चोपलक्षणम्" इति। लक्षितस्य उदात्तालङ्कारस्य लक्ष्यतां यन्त्येव। मन्त्रद्वन्द्वमात्रमत्रोदाह्रियते–

**ऋचो अक्षरे परमे व्योमन्**
**यस्मिन् देवा अधि विश्वे निषेदुः।**
**यस्तं न वेद किमृचा करिष्यति**
**य इत्तद्विदुस्त इमे समासते।**[1][8]
**न सन्दृशे तिष्ठति रूपमस्य**
**न चक्षुषा पश्यति कश्चनैनम्।**
**हृदा हृदिस्थं मनसा य एन-**
**मेवं विदुरमृतास्ते भवन्ति।।** [20] इति।

निर्गुणस्य निराकारस्य तुरीयस्य ब्रह्मणः प्रतिपादका **"यतो वाचो निवर्तन्त"**[तैत्तिरीयोपनिषत्], "अस्थूलमनण्वह्रस्वमलोहितमस्नेह–मच्छायमतमोऽवाय्वनाकाशमसंगमरसमगन्धमचक्षुष्कमश्रोत्रमवाग–मनोऽतेजस्कमप्राणममुखममात्रमनन्तरमबाह्यं न तदश्नाति किञ्चन न तदश्नाति कश्चन" [बृहदारण्यकोपनिषत्–7]

"नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम्। अदृश्यमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्म–प्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः" [माण्डूक्योपनिषत्–7] इत्याद्याः मन्त्राः

**"पर्यायोक्तं यदन्येन प्रकारेणाभिधीयते।**
**वाच्यवाचकवृत्तिभ्यां शून्येनावगमात्मना।।"**[9]

इति लक्षितस्य पर्यायोक्तालङ्कारस्य लक्ष्या भवेयुः।

एवं शब्दार्थगतैर्बाह्यैः अलङ्कारैरलङ्कृता उपनिषदः आन्तरैरप्यलङ्कारैर्मण्डिता एव। सुन्दरकाव्यपदवीं स्वीयया कान्त्या भूषयन्त्यपि। रससिद्धान्तदृशा पश्यामश्चेत् अत्र तृष्णाक्षयसुखरूपः शमाख्य एव स्थायी भावः।



**"यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम्।**
**तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम्।।"**[10]

इति निवृत्ततर्षैरुपगीतस्य निर्वेदापराभिधस्य शमस्य भजनीयतां भङ्ग्यन्तरेण प्रतिपादयन्त्यः उपनिषदः सर्वरसप्रकृतिभूतं शान्तमेवाङ्गिनं कुर्वन्ति। तदुपकारकत्वेन अन्येऽपि रसाः तत्र तत्र प्रयुक्ता दृश्यन्ते। बालस्यापि नचिकेतसः पितृवाक्यपरिपालनाय वैवस्वतान्तिकगमनं, तत्र च तिस्रो रात्रीरनश्नतो वासः, प्रलोभ्यमानेनापि मृत्युरहस्यस्यैव तृतीयवरत्वेन वरणमित्येतत्सर्वम् उत्साहस्थायिनं वीरं पोषयन्त्येव।

प्रायः सर्वासामुपनिषदां शरीरघटनां निर्वर्णयामश्चेत् प्रकरणवक्रता प्रबन्धवक्रता च सम्यक् प्रयुक्ता द्रष्टुं शक्यते। कठोपनिषदि भूमिकात्वेन रचितः नचिकेतोवैवस्वतसंवादः प्रकरणवक्रतायाः उत्तममुदाहरणम्। ब्रह्मविद्यायाः सर्वविद्याश्रेष्ठतां तदधिकारिलक्षणं सर्वोपास्यताञ्च हृद्यया शैल्या प्रबोधयति भगवती श्रुतिरत्र–

**"देवैरत्रापि विचिकित्सितं पुरा**
**न हि सुविज्ञेयमणुरेष धर्मः ।**
**अन्यं वरं नचिकेतो वृणीष्व**
**मा मोपरोत्सीरति मा सृजैनम् ।।** [ I/21 ]

इति नचिकेतसो हृदयं जिज्ञासमानेन यमेनाभिहितो नचिकेताः

**"देवैरत्रापि विचिकित्सितं किल**
**त्वं च मृत्यो यन्न सुज्ञेयमात्थ ।**
**वक्ता चास्य त्वादृगन्यो न लभ्यो**
**नान्यो वरस्तुल्य एतस्य कश्चित् ।।"**

इति प्रतिवदन् आत्मनो धीरतां ब्रह्मविद्यायामधिकारं च प्रकटयति। पुनरपि सांसारिकैरसारैर्बहुभिर्भोगैः प्रलोभ्यमानोऽपि सः

**"श्वोभावा मर्त्यस्य यदन्तकैतत्**
**सर्वेन्द्रियाणां जरयन्ति तेजः।**

अपि सर्वं जीवितमल्पमेव
तवैव वाहास्तव नृत्तगीते॥''

इति संसारस्यासारता ब्रह्मविद्यायाः सर्वविवेक्युपास्यतां च सम्यगभिदधाति। एवं सूक्ष्मेक्षिकया निर्वर्णयामश्चेत् प्रकरणवक्रता प्रबन्धवक्रता च सुष्ठु प्रयुक्ते दृश्येते सर्वासूपनिषत्सु।

न केवलमलङ्कारशास्त्रतत्त्वानाम् उदाहरणतां प्रतिपद्यन्ते उपनिषत्सन्दर्भाः किन्तु अलङ्कारशास्त्रस्य विकासे परिपोषे च उपनिषत्तत्त्वैर्बहु उपकृतमपि। अलङ्कारशास्त्रोपनिषद्भूतस्य रससिद्धान्तस्य मूलमेव उपनिषद इत्यलङ्कारशास्त्रेतिहासविदो वदन्ति। परिनिष्ठतार्थविषयोन्मेषया वैपश्चित्या दृशा अलङ्कारशास्त्रतत्त्वान्याविष्कुर्वन्तो नैयायिकसरणीमनुवर्तमानाः जगन्नाथाचार्याः ब्रह्मविद्यानुरोधेनैव रससूत्रव्याख्यानमाचख्युः। काव्यास्वादस्य सुखांशभाने किं प्रमाणमिति प्रदर्शयन्तस्ते एवमभिदधति–

''................अस्त्यत्रापि **'रसो वै सः,' 'रसं ह्येवायं लब्ध्वानन्दीभवति'** इति श्रुतिः सकलसहृदयप्रत्यक्षञ्चेति प्रमाणद्वयम्''[12] इति। एवं तैत्तिरीयोपनिषत्सन्दर्भेण काव्यास्वादस्य सुखांशभानं समर्थितम्। एतेषामाचार्याणां मते भग्नावरणा चिदेव रसः।

**''विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः''** इति भरतमुनिप्रोक्तस्य रससूत्रस्य ''विभावानुभावव्यभिचारिभिः संयोगाद् व्यञ्जनाद् रसस्य चिदानन्दविशिष्टस्थाय्यात्मनः स्थाय्युपहितचिदानन्दात्मनो वा निष्पत्तिः स्वरूपेण प्रकाशनम्''[13] इति अभिनवगुप्ताचार्यं पुरस्कृत्य उपनिषद्दिशा एतैः कृतं व्याख्यानं अलङ्कारशास्त्रे उपनिषदां प्रभावं सम्यग् व्यनक्त्येव।

तदेव काव्यत्वाधायकैरान्तरैरलङ्कारैः शब्दार्थोपकारकैर्बाह्यैश्चालङ्कारैरलङ्कृता उपनिषदः अलङ्कारशास्त्रतत्त्वानां लक्ष्यत्वं मार्गदर्शकत्वञ्च आवहन्त्यः आलङ्कारिककुलेषु स्वीयं वात्सल्यदुग्धं बहुधा दुहन्तीत्येतन्निर्विवादं निश्चप्रचञ्चेति शम्।।



**पादटिप्पणी**

1. वक्रोक्तिजीवितम्, सम्पा० डा. के. कृष्णमूर्ति, कर्णाटक विश्वविद्यालयः, धारवाड, १९७७, पृ. ५
2. काव्यालङ्कारसूत्राणि, निर्णयसागर प्रेस्, मुम्बई–2, १९५३, पृ. २
3. वक्रोक्तिजीवितम्
4. ध्वन्यालोकः (सलोचनः), सम्पा. आचार्य जगन्नाथ पाठक, चौखम्बा विद्याभवन, वाराणसी, तृतीयं संस्करणम्, १९८२, पृ. २२६
5. काव्यमीमांसा, द्वितीयोऽध्यायः, सम्पा० डा. गङ्गासागर राय, चौखम्बा विद्याभवन, वाराणसी, १९८२, पृ. ५
6. रसगङ्गाधरः, सम्पा० भट्टमथुरानाथशास्त्री, मोतीलाल बनारसीदास, नई दिल्ली, १९८८, पृ. ४२२
7. काव्यप्रकाशः, सम्पा० श्रीहरिशङ्करशर्मा, चौखम्भा संस्कृत संस्थान, वाराणसी, १९९६, पृ. २९२
8. ईशादिदशोपनिषदः, मोतीलाल बनारसीदास, नई दिल्ली, १९९२, पृ. ५
9. भामहालङ्कारः III / 8.
10. ध्वन्यालोकः, (वृत्तौ उद्धृतः) पृ. ४३२
11. इतिवृत्तप्रयुक्तेऽपि कथावैचित्र्यवर्त्मनि।
उत्पाद्यलवलावण्यादन्या लसति वक्रता।।
तथा यथा प्रबन्धस्य सकलस्यापि जीवितम्।
भाति प्रकरणं काष्ठाधिरूढसनिर्भरम्।।
[वक्रोक्तिजीवितम् IV / 3,4,]
इतिवृत्तान्यथावृत्तरससम्पदुपेक्षया
रसान्तरेण रम्येण यत्र निर्वहणं भवेत्।
तस्या एव कथामूर्तेरमूलोन्मीलितश्रियः
विनेयानन्दनिष्पत्त्यै सा प्रबन्धस्य वक्रता।।
[वक्रोक्तिजीवितम् IV / 15,17]
12. रसगङ्गाधरः पृ. २८
13. तस्मिन्नेव ग्रन्थे– पृ. ३५

❖ ❖ ❖

# संस्कृतप्रसारपरिषद्, आरा

## संक्षिप्तम् इतिवृत्तम्

- स्थापनातिथिः 22.2.1987
- निबन्धनसंख्या 424/1994-95
- कार्यालय :- संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम्, प्रकाशपुरी, आरा (विहारः) 802301 दूरभाषसंख्या - (06182) 24193
- आरण्यकम् (अर्धवार्षिकं संस्कृतशोधपत्रम्, प्रतिवर्षं मार्च, सितम्बरमासयोः प्रकाश्यमानम्)
- पञ्जीकरणसंख्या - RNI 58951/94
- संस्कृतविदुषां सम्मानः (प्रतिवर्षं क्रियमाणः)। अथ सम्मानिताः विद्वांसः-

| | | सम्माननवर्षम् |
|---|---|---|
| 1. | पण्डित कमलाकान्त उपाध्यायः | 1988 |
| 2. | पण्डित चन्द्रशेखर पाठकः | 1989 |
| 3. | पण्डित सीताराम उपाध्यायः | 1989 |
| 4. | पण्डित सभानाथ पाठकः | 1990 |
| 5. | पण्डित रङ्गनाथ पाण्डेयः | 1990 |
| 6 | पण्डित रामेश्वरनाथ पाठकः | 1992 |
| 7 | पण्डित केदारनाथ शुक्लः | 1993 |
| 8. | पण्डित जनार्दन मिश्रः | 1994 |
| 9. | पण्डित रामनरेश त्रिपाठी | 1995 |
| 10. | पण्डित रामनारायण पाण्डेयः | 1995 |
| 11. | पण्डित रामप्रवेश त्रिपाठी | 1996 |
| 12. | पण्डित गिरिजानन्दन मिश्रः | 1997 |
| 13. | पण्डित अम्बिकादत्त त्रिपाठी 'व्यासः' | 1998 |
| 14. | पण्डित डॉ० श्यामानन्द झा | 1999 |
| 15. | पण्डित व्रजभूषण मिश्र 'आक्रान्तः' | 2000 |
| 16. | पण्डित जगदीश्वर प्रसाद मिश्र 'नलिनः' | 2000 |
| 17. | पण्डित जयानन्द मिश्रः | 2001 |

- प्रकाशितानि - 12 पुस्तकानि (वितरणं शोधपत्रस्य पृष्ठभागे)
- संस्कृतकविगोष्ठी-संस्कृतविचारगोष्ठीनाम् आयोजनम्
- संस्कृतसम्भाषणशिविराणाम् आयोजनम्
- महाविद्यालय/उच्च-मध्य-प्राथमिकविद्यालयस्तरीय-संस्कृतप्रतियोगितानाम् आयोजनम्
- वर्ष 2000 तः 'अन्नपूर्णादेवीस्मारिका संस्कृतप्रतियोगिता' द्वारा प्रतियोगितापुरःसरं पुरस्कार-प्रमाणपत्रादिवितरणम् ।
- संस्कृतवर्षम् (1999-2000) उपलक्ष्य केन्द्र सर्वकारस्य अनुदानेन संस्कृतशिक्षक-प्रशिक्षणवर्ग - 51 संस्कृतसम्भाषणशिविर-संस्कृतसङ्गम (14 अप्रैल, 2000) इति संस्कृतसम्भाषण-अभियानसञ्चालनम् । ❖



# शास्त्रेषु जलतत्त्वम्

*मनीष कुमार सिंहः*

गङ्गास्तोत्रे वाल्मीकिः जलतत्त्वस्य महिमानं स्पष्टतया वर्णयति–

"ब्रह्माण्डं खण्डयन्ती हरशिरसि जटावल्लिमुल्लासयन्ती,
स्वर्लोकादापतन्ती कनकगिरिगुहागण्डशैलात्स्खलन्ती।
क्षोणीपृष्ठे लुठन्ती दुरितचयचयं निर्भरं भर्त्सयन्ती,
पाथोधिं पूरयन्ती सुरनगरसरित् पावनी नः पुनातु।।"

तत्किञ्चिदपीतरं नास्ति अपितु जलतत्त्वमेव अस्ति। अपां चतस्रः अवस्थाः स्पष्टाक्षरैः वेदेषु वर्णिताः। ऐतरेयब्राह्मणे कथितं यत्–

"आत्मा वा इदमेकमेवाग्र आसीन्नान्यत्किञ्चनमिषत्। स ईक्षत् लोकान्नु सृजा इति। स इमांल्लोकानसृजत अम्भो मरीचिर्भर आपः। अदोऽम्भः परेण दिवं द्यौः प्रतिष्ठाः अन्तरिक्षम् आपः। अदोऽम्भः परेण दिवं द्यौः प्रतिष्ठाः अन्तरिक्षं मरीचयः पृथिवी भरः, या अधस्तात्ता आपः। स ईक्षते मे नु लोका लोकपालान्नु सृजा इति।"

ये सूर्यमण्डलात् ऊर्ध्वप्रदेशे महः जनः इत्यादयो लोकाः व्याप्ताः तदम्भः अस्ति। अन्तरिक्षे यज्जलं व्याप्तं तन्मरीचिरूपम् अस्ति। एवं पृथिव्याः उत्पादने यज्जलम् अग्रसरं भवति तद् भरः अस्ति। तथा च पृथिव्यां प्रवहणशीलम् अथवा पृथिव्याः खननेन निःसरणशीलम् आपो रूपमस्ति। एषु यत् सर्वप्रथमं तत् 'अम्भ' इति नाम्ना कथितम्। तन्मौलिकं जलतत्त्वमस्ति। तदेव पञ्चीकृतं भूत्वा अन्येषां तत्त्वानां

सम्मिश्रणेन स्थूलावस्थां प्राप्य जलरूपेण परिणतम् अभवत्। यत्पीत्वा वयं स्वकीयां तृष्णां दूरीकुर्मः। अस्य स्थूलजलस्य सम्मिश्रितं रूपं मन्त्रब्राह्मणेषु विस्तारेण वर्णितम्–

**"ॐ या दिव्या आपः पयसा सम्बभूवु–**
**र्या अन्तरिक्षा उत पार्थिवीर्याः।**
**हिरण्यवर्णा याज्ञियास्ता न आपः,**
**शिवाः शंस्योनाः सुष्वा भवन्तु॥"**

अथर्ववेदस्यापि राज्याभिषेकप्रकरणस्य एकस्मिन् मन्त्रे त्रयाणामेव पयसाम् उल्लेखः–

"या आपो दिव्या पयसा मदन्त्यन्तरिक्ष उत वा पृथिव्याम्।
तासां त्वा सर्वासामपामन्निषिञ्चामि वर्चसा।।"

ऋग्वेदस्य एकस्मिन् मन्त्रे पार्थिवजलस्य त्रयो विभागाः प्राप्ताः–

"या आपो दिव्या उत याः स्रवन्ति,
खनित्रिमा उत या स्वयंजाः।
समुद्रार्था याः शुचयः पावकास्ता,
आपो देवीरिह भावयन्त।।"

ब्राह्मणोपनिषदोः मनुस्मृतौ पुराणे च सर्वत्र सृष्ट्यारम्भे अपाम् उत्पत्तिः कथिता। अप् इति नाम यद्यपि जलस्य एव प्रसिद्धम् अस्ति, किन्तु एतैः स्थूलैः अद्भिः तत्र तात्पर्यं न अपितु रसरूपं द्रव्यं पदार्थः तत्र अम्भो वा अप् शब्दस्य अर्थः अस्ति। तत्रैव अप् वा अम्भः दिव्यजलं कथयितुं योग्यम्। यद्यपि ते एकस्मात् तत्त्वात् प्रादुर्भवन्ति तथापि अवस्थासु पारस्परिको विरोधो भवति।

भगवान् भास्करः यदा उदयाचलेषु आगच्छति, तदा तस्य किरणसंघर्षेण आपः स्वस्थानं त्यक्त्वा दूरं गच्छन्ति। ध्रुवप्रदेशे यत्र सूर्यकिरणाः अतिमन्दा भवन्ति तत्र एताः आपः एकीभूताः। अत्यन्तम्



एकीभावेन तत्र एताः घनीभूताः भूत्वा स्थूलजलस्य रूपेण आगच्छन्ति तथा गुरुत्वस्य कारणात् वायौ न स्थातुं शक्नुवन्ति।

अतएव कनकगिरिशिखरेषु निपतन्ति, तदैव गङ्गा शब्देनव्यवह्रियते।

इतिहास–पुराणेषु सर्वत्र ध्रुवस्य उपरितनभागात् सुमेरौ गङ्गायाः पयसां पतनम्। मल्लिनाथः स्वर्गलोकस्य, पृथ्वीलोकस्य, पाताललोकस्य च गङ्गायाः पृथक्–पृथक् वर्णनं कृतवान्। तद्यथा –

मंदाकिनी, भागीरथी, भोगवती चेति।

❖ ❖ ❖

# प्रतिध्वनिः

*समीक्षकः - सुनील कुमार प्रधानः*

पुस्तकस्य नाम–प्रतिध्वनिः, रचयिता–डॉ० रवीन्द्र कुमार पण्डा प्रकाशकः–उत्कल साहित्य समाजः, प्रयागः, सम्पादकः–डॉ० बनमाली विश्वालः, वरिष्ठव्याख्याता, जी० एन० झा केन्द्रिय संस्कृत विद्यापीठम् आजाद पार्क, इलाहाबाद (उ० प्र०)–211002, प्रकाशनवर्षम्–1996, पृष्ठानि–72, मूल्यम्–50/– रूप्यकाणि।

सप्ताशीति–कवितानां सङ्गहोऽयं 'प्रतिध्वनिः' काव्यरसिकानां पुरतः आगतोऽस्तीति मोदविषयः। दर्शनतत्त्वानां माधुर्येण प्रतिष्ठापनम् एतस्य प्रतिपाद्यो विषयः। रचयिता खलु डॉ० रवीन्द्र कुमार पण्डा प्रगतिशीलानां रचयितृणाम् अन्यतमः। मुक्तछन्दोभिः काव्यं विधाय कविः प्रयोगवादिकाव्यरचनायां विशिष्टं स्थानमधिकरोति। प्रत्येकस्यां कवितायां यद् भावगाम्भीर्यं कविना कुशलतया निरूपितं तद्विलक्षणमेव। लघु–लघुकवितासु अपि जीवनदर्शनस्य सहजतया उल्लेखः कवेः प्रौढकाव्यरचनाप्रतिभामेव प्रदर्शयति। प्रतीकात्मककवितासु आधुनिकं वैश्विकं परिदृश्यमपि अद्भुतम्–

**'रावणस्य प्राचुर्येण**
**रामस्य किं देयमुत नेयम् ?**
**सत्यं पालयितुं वनवासः**
**तस्य जीवनस्य ध्येयम् ।'** (किं देयं नेयम्)

संसारस्य असारतां निरूप्य कविः नितरां मोदमार्गम् अन्वेष्टुकामः। क्वचित् जीवात्मपरमात्मयोर्मध्ये अभिन्नतां प्रतिपाद्य कविः 'अहं ब्रह्मास्मि' तथा च क्वापि 'पूर्णमदः पूर्णमिदं' कविताद्वारा शाश्वतसत्यम् उद्घाटयति।

कवेः रचनाशैली नूतना, भावाः पुरातनाः किन्तु नवीनदृष्टान्तैः ते भावाः सहजतया अवगम्या इति कवेः वैशिष्ट्यम्। पुस्तकस्य कलेवरम् अतीव चित्ताकर्षकम्। यद्यपि पुस्तकस्य अन्ते शुद्धिपत्रं संवलितमस्ति तथापि मुद्रणदोषाः प्रचुरतया प्राप्यन्ते। आधुनिकं काव्यानुगुणं विरचितोऽयं कवितासङ्ग्रहः बुधानां कर्णगुहायां प्रतिध्वनयत्विति शुभाकाङ्क्षा। ❖



# वेदपुराणयोः पुनर्जन्मसिद्धान्तः

*डॉ. धर्मेन्द्रकुमारसिंहदेवः*

पुनर्जन्म नामाऽनागतं जन्म। पुनर्जन्मविषयमधिकृत्य वेदेषु भृशं विवेचनं कृतं विद्यते। पुराणं हि वेदोपबृंहणमिति सुविदितमेव। तस्मादिहापि पुनर्जन्मसन्दर्भा बहुश उपलभ्यन्ते। तेनात्र वेदेषु पुराणेषु च प्रतिपादितेषु विविच्य पुनर्जन्मसिद्धान्तं सङ्क्षेपेण प्रस्तोतुमयमुपक्रमः।

वैदिकवचनानि वा पुराणानि वा सर्वथा पुनर्जन्मसिद्धान्तं समर्थयन्ति। तत्र संहितायां मरणानन्तरमात्मानमिन्द्रियादीनां प्राणादीनां च पुनः प्राप्तिर्भवतु इति प्राणप्रदायिन्या देव्याः स्तुतौ मन्त्रोऽयं सूचयति–

**असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगम्।**[1]

यजुर्वेदस्यापि मन्त्रेऽस्मिन् पुनर्जन्मने निर्देशो दरीदृश्यते–

**प्रसद्य भस्मना योनिम् अपश्च पृथिवीमग्ने।**
**सो सृज्य मातृभिष्ट्वं ज्योतिष्मान् पुनरासदः।।**[2]

अपि च, ऋषीणां वचांसि पुर्जन्मविषयान् वेदेषु सङ्केतयन्ति। यथा वामदेव ऋषिः प्राह–

**अहं मनुरभवं सूर्यश्चाहं कक्षीवाँ ऋषिरस्मि विप्रः।**[3]

किञ्च, ऋग्वेदस्य सप्तमे मण्डले त्रयस्त्रिंशत्तमं (मं.७, सू.३३) सम्पूर्णं सूक्तमिदं महर्षेर्वसिष्ठस्य पुनर्जन्मविषयकं तथ्यं प्रकटयति। एवं पुराणेष्वपि पुनर्जन्मप्रसङ्गा उपलभ्यन्ते। यथा भगवते वृत्रासुरादयस्तत्र तत्र प्रसिद्धाः।

तत्रापि मुक्तपुरुषानतिरिच्य सर्वे जायन्ते म्रियन्ते, म्रियन्ते जायन्ते चेति सिद्धमस्ति। यथोपनिषत्सु प्रोच्यते–

न साम्परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम्।
अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे॥[4]

अपि च सन्ति वैदिकवचनानि, यत्र जीवमुखेनैव समाम्नातं दृश्यते–

मृतश्चाहं पुनर्जातो जातश्चाहं पुनर्मृतः।
नानायोनिसहस्राणि मयोषितानि यानि वै॥[5]

एवं श्रौतसाहित्ये, छान्दोग्ये बृहदारण्यके च पुनर्जन्मविषयका बहवो मन्त्रा दरीदृश्यन्ते। पञ्चाग्निविद्याया अवसाने बृहदारण्यके समाम्नायते–

ते पुनः पुरुषाग्नौ हूयन्ते ततो योषाग्नौ जायन्ते लोकान् प्रत्युत्थायिनस्त एवमेवानुपरिवर्तन्ते।[6]

अनुपरिवर्तनं चैतत् पुनर्जन्म सङ्केतयति।

छान्दोग्ये तु पञ्चाग्निविद्यावर्णनप्रसङ्गे यदुक्तं तत्पुनर्जन्मस्वरूपज्ञानाय पर्याप्नोति। तस्मात्तदेवेह प्रस्तूयते–

१. असौ वाव लोक गौतमाग्निः.................। तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुते सोमो राजा सम्भवति ।

२. पर्जन्यो वाव गौतमाग्निः .................। तस्मिन्नेतस्मिन्नग्नौ देवाः सोमं राजानं जुह्वति तस्या आहुतेर्वर्षं सम्भवति ।

३. पृथिवी वाव गौतमाग्निः .................। तस्मिन्नेतस्मिन्नग्नौ देवा वर्षं जुह्वति तस्या आहुतेरन्नं सम्भवति।

४. पुरुषो वाव गौतमाग्निः ................। तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति तस्या आहुते रेतः सम्भवति।

५. योषा वाव गौतमाग्निः ................। तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुतेर्गर्भः सम्भवति ।

इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवतीति स उल्बावृतो गर्भो दश वा नव वा मासानन्तः शयित्वा वाथ जायते।

स जातो यावदायुष्यं जीवति तं प्रेतं दिष्टमितोऽग्नय एव हरन्ति यतः सम्भूतो भवति।[7]





श्रीमद्भागवतमहापुराणे जीवमुखेनाह–

**कस्मिञ्जन्मन्यमी मह्यं पितरं मातरोऽभवन्।**
**कर्मभिर्भ्राम्यमाणस्य देवतिर्यङ्नृयोनिषु॥**[8]

तथा च,

**कर्मणा दैवनेत्रेण जन्तुर्देहोपपत्तये।**
**स्त्रियाः प्रविष्ट उदरं पुंसा रेतःकणाश्रयाः॥**[9]

अनेन कर्मानुसारेण जीवो विविधेषु योनिषु भ्रमति। एवमेव देहप्राप्तये अर्थात् मनुष्यजन्मलाभाय पञ्चम्यामग्नावुक्तरीत्या प्रविशतीति स्पष्टम्।

महाभारतेऽपि महर्षिणा भृगुणा भरद्वाजाय यदुक्तं तदपीह विज्ञेयम्–

**न जीवनाशोऽस्ति हि देहभेदे**
**मिथ्यैतदाहुर्मृत इत्यबुद्धाः।**
**जीवस्तु देहान्तरितः प्रयाति**
**दशाधोतैवास्य शरीरभेदः॥**[10]

अत्रेदं तात्पर्यम्। देहस्य नाशे सत्यपि न जीवस्य नाशः। ते खलु मूढा ये जीवस्य मृत्युं वदन्ति। जीवाः खलु निष्प्राणं शरीरं परित्यज्य शरीरान्तरं प्रतिपद्यन्ते। तत्त्वपञ्चकस्य पृथग्भाव एव शरीरनाशः। जीवस्तु महाभूतेभ्यः पृथगभिमत इति।

अत्रायं सारः। जीवो जायस्व म्रियस्वेति प्रक्रियां वितन्वानस्तथा कर्माणि कुरुते यथा कदाचित् स्वर्गादिलोकान् गत्वा पुण्यक्षयात् पुनर्मानुषतां लभते। यदि पापबाहुल्येन नोत्तमलोकान् प्रतिपद्यते तदा तिर्यक्कीटपतङ्गादिरूपेण जायत इति समासेन पुनर्जन्मस्वरूपम्।

## पुनर्जन्मनः कारणम्

कर्मैव पुनर्जन्मने कारणम्। यथा चोपनिषदि–

यथाकारी यथाचारी तथा भवति। साधुकारी साधुर्भवति। पापकारी पापो भवति। पुण्यः पुण्येन कर्मणा। पापः पापेन।[11]



अपि चैतरेयब्राह्मणस्य भाष्ये शङ्करभगवत्पादैः स्पष्टमुक्तम्–

संसारित्वे काम एव हेतुरिति।[12]

तदेतदेव सम्पूर्णमपि कर्म सामान्यतया त्रिविधम् – क्रियमाणं सञ्चितं प्रारब्धञ्चेति। यथा–

क्रियमाणं कर्म नामैतस्मिन् जन्मनि क्रियमाणव्यापारं कालान्तरफलभोग–साधनञ्चेति। क्रियामाणं कर्म हि सञ्चितकर्मरूपेण परिणमन्ति। सञ्चितं कर्म–**अनारब्धकर्मविपाकः कर्माशयः सञ्चितम्।**[13] अर्थात् यस्य कर्मणो विपाको नैवारंब्धस्तन्नाम सञ्चितम्। प्रारब्धं कर्म–आरब्धविपाकश्च कर्माशयः प्रारब्धम्।[14]

अत्रेदं ज्ञेयम्। फलविपाकारम्भाणि कर्माणि व्यापारारम्भात् प्रभृति क्रियासमाप्तिपर्यन्तं क्रियमाणानि निगद्यन्ते। तत्र च तान्येव सर्वाणीह जन्मनि क्रियमाणानि कर्माणि सञ्चितानि भवन्ति। एतज्जन्मार्जितानि पूर्वजन्मार्जितानि वाऽनेकजन्मार्जितानि च सञ्चितेभ्यो वि[illegible] यानि कर्माणि एकीभूय शरीरमारभन्ते भोगपर्यन्तञ्च तच्छरीरं धारयन्ति, तानि प्रारब्धकर्माणि। तेषामवश्यम्भावी भोग इति सिद्धान्तः। तत्रापि पुनर्जन्मने चायमेव कर्मणां क्रमः–

क्रियमाणम् → सञ्चितम् → प्रारब्धम्
⇓
पुनर्जन्म

तत्रापि पुनः–

**तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वाऽथ इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् अश्वयोनिं वा सूकरयोनिं वा चाण्डालयोनिं वा।**[15]

एवं कर्मानुरूपं पुनर्जन्म लभन्ते। तत्र पुण्येन कर्मणा स्वर्गादिप्राप्तिः पापेन च कर्मणा नारकयोनिप्राप्तिरिति पुराणेष्वपि प्राप्यते। यथा अग्निपुराणे नरकवर्णनप्रसङ्गे प्रतिपादितं वर्तते–

**अन्यच्छरीरमादत्ते यातनीयं स्वकर्मभिः।**
**भुङ्क्ते पापकृद्दुःखं सुखं धर्माय संगतः॥**

**नीयते यमदूतैस्तु यमं प्राणिभयङ्करैः।**
**कुपथे दक्षिणद्वारि धार्मिकः पश्चिमादिभिः॥**

**यमाज्ञप्तैः किंकरैस्तु पात्यते नरकेषु च।**
**स्वर्गे तु नीयते धर्माद्विशिष्टाद्युक्तिसंश्रयात्॥**[16]

अपि च, ब्रह्मपुराणस्य चतुर्विंशत्यधिकद्विशततमेऽध्याये (२२४) उमामहेश्वरसंवादे मानवानामुत्तमगतिप्राप्तिवर्णनं विद्यते। तत्र कर्मणा मनसा वाचा त्रिविधैः कर्मभिर्देहिनः कथं स्वर्गगामिनो भवन्ति, कथं वा कर्मबन्धनैः पुरुषा विमुच्यन्त इति महेश्वरः साक्षात् पार्वतीं श्रावयति। एतद्विषये सम्पूर्णोऽध्यायो विलोकनीयः। परमत्र साररूपेण इत्थमेव प्रस्तूयते–

**शुभेन कर्मणा देवि प्राणघातविवर्जितः।**
**निक्षिप्तशस्त्रे निर्दण्डो न हिंसति कदाचन॥**

**न घातयते नो हन्ति घ्नन्तं नैवानुमोदते।**
**सर्वभूतेषु पुरुषः सस्नेहो यथाऽऽत्मनि तथा परे॥**

**ईदृशः पुरुषो नित्यं देवि देवत्वमश्नुते।**
**उपपन्नान्मुखान्योगान्सदाऽश्नाति मुदा युतः ॥**

**अथ चेन्मानुषे लोके कदाचिदुपपद्यते।**
**एष दीर्घायुषां मार्गः सुवृत्तानां सुकर्मणाम्॥**[17]

अपि च पञ्चविंशत्यधिकद्विशततमेऽध्याये मानवानां देवलोकस्य नारकलोकस्य प्राप्तिरुक्ता विद्यते। उत्तमकर्मभिस्तेषां कल्याणामित्युच्यते। कर्मणां विभागस्तु आगमलोकधर्माणां मर्यादाः पूर्वनिर्मिताः।



तदनुसारेणोत्तमलोकप्राप्तये मानवैः प्रयतनीयमिति फलितार्थः।

पुनर्जन्मकारणं प्रति सामान्यतया प्राणिनो द्वे गती वेदितव्ये देवयानञ्च पितृयाणञ्चेति। त एव पुनरुत्तरायण–दक्षिणायनशब्दाभ्यां निगद्येते। मनुष्याः सुखाय प्रयतन्ते। तत्कृते केचन ज्ञानमर्जयन्ति सद्योमुक्तये वा क्रममुक्तये वा। अपरे किलेष्टापूर्ताचरणेन स्वर्गादिसुखं प्राप्तुकामा भवन्ति। तत्र तावद् दक्षिणायनमार्गमधिकृत्य सङ्क्षेपेण विविच्यते।

## दक्षिणायनम् :

यथा चाह निरुक्तकारः–

**अथ ये हिंसामाश्रित्य विद्यामुत्सृज्य महत्तपस्तेपिरे चिरेण वेदोक्तानि वा कर्माणि कुर्वन्ति ते धूममभिसम्भवन्ति । धूमाद् रात्रिं, रात्रेरपक्षीयमाणपक्षम्।**

**अपक्षीयमाणपक्षाद् दक्षिणायनम्, दक्षिणायनात् पितृलोकम्, पितृलोकाच्चन्द्रमसम्, चन्द्रमसो वायुम्, वायोर्वृष्टिम्, वृष्टेरोषधयश्चैतद् भूत्वा तस्य संक्षये पुनरेवेमं लोकं प्रतिपद्यन्ते ।**[18]

अत्र धूमरात्रिप्रभृतयोऽधिदेवरूपमर्थमभिदधाति। दक्षिणायनशब्दस्य तु स्पष्टमेव प्रयोगः कृतः। तत्रापि तदधिष्ठातृदेव एव गृह्यते। पितृपदं मातापित्रोर्वाचकम्, माता च पिता च पितरौ तयोर्लोक इति व्युत्पत्तेः। तत्र माता पृथिवीत्यनर्थान्तरम्। **'माता भूमिः पुत्रोऽहं पृथिव्या'** इत्याथर्वणश्रुतेः। पितृपदञ्च द्युलोकवाचकम्। तेन द्यावापृथिव्योरन्तराले गतिरुक्तेत्युपपन्नम्। तत्तत्कर्मलिप्तो जीवस्तत्तत्कर्मफलभोगाय मनुष्यलोकं प्रतिपद्यत इति श्रुतेराशयः।

## उत्तरायणम् :

अथोत्तरायणं विवब्रुः – .

**अथ ये हिंसामुत्सृज्य विद्यामाश्रित्य महत्तपस्तेपिरे ज्ञानोक्तानि वा कर्माणि कुर्वन्ति तेऽर्चिरभिसम्भवन्ति। अर्चिषोऽहरह आपूर्यमाणपक्षम्,**

**आपूर्यमाणपक्षादुदगयनमुदगयनाद् देवलोकम्। देवलोकादादित्यम्, आदित्याद् वैद्युतम्, वैद्युतान्मानसम्। मानसः पुरुषो भूत्वा ब्रह्मलोकमभिसम्भवन्ति । ते न पुनरावर्तन्ते।**[19]

इदमुत्तरायणम्। एतेऽपि न सद्योमुक्ता भवन्ति, किं तर्हि पितृलोकं नैव प्रतिपद्यन्ते। अयं हि कार्यब्रह्मणो लोकस्य मार्गः। ते च तत्र गत्वा ज्ञानार्जनं विधाय क्रममुक्तिभाजो भवन्ति। ये नाम दक्षिणायनं लभन्ते, ते मनुष्यलोकं प्रतिपद्यन्ते। किन्तु,

**शिष्टा दन्दशूका य इदं न जानन्ति । तस्मादिदं वेदितव्यम्।**[20]

इह दन्दशूकपदं मनुष्येतरतिर्यगादिकीटपतङ्गादियोनिवाचकम्। अत्र च ये केवलं खादतमोदतां सिद्धान्तं मत्वा विसरन्ति, ते तु तिर्यगादियोनिं लभन्त इति फलितम्।

भागवतेऽपि द्वितीयस्कन्धस्य द्वितीयेऽध्याये देवयानमधिकृत्य योगिनां क्रममुक्तये ज्ञानेन च सद्योमुक्तये प्रयासो विधेय इति विस्तृतेन वर्णनं दृश्यते। तत्र क्रममुक्तिर्यथा—

**वैश्वानरं याति विहायसा गतः**
**सुषुम्णया ब्रह्मपथेन शोचिषा।**
**विधूतकल्कोऽथ हरेरुदस्तात्**
**प्रयाति चक्रं न-प शैशुमारम्।।**

**.............................................**

**तेनात्मनाऽऽत्मानमुपैति शान्त-**
**मानन्दमानन्दमयोऽवसाने।**
**एतां गतिं भागवतीं गतो यः**
**स वै पुनर्नेह विषज्जतेऽङ्ग ।।**[21]

सैव क्रममुक्तिप्रक्रिया स्पष्टीकृता विद्यते—



क्रममुक्तिप्रक्रिया (भागवते)—




सद्योमुक्तये भागवतस्य द्वितीये स्कन्धे द्वितीयाध्यायस्य प्रथमश्लोकाद् एकविंशतिश्लोकपर्यन्तं (२.२.१–२१) वर्णनं दृश्यते। तत्र भक्तियोगेन भगवत्परायणाः सन्तो ज्ञानदृष्ट्या वासनां विनश्य ब्रह्मनिष्ठा योगिनः शरीरं परित्यज्य सद्योमुक्तिभाजो भवन्तीति।

एवञ्चैतेषां निष्कर्षरूपेण श्रीमद्भगवद्गीतायामष्टमेऽध्याये श्रीभगवानुवाच–

> अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
> तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥
> धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
> तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥
> शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ।
> एकया यात्यनावृत्तिमन्ययावर्तते पुनः ॥[22]

एवं कर्मैव पुनर्जन्मनः कारणमिति सङ्क्षेपेणात्र स्पष्टीकृतम्। तच्च कर्मैव त्रिधा कर्मकर्तृमनुष्यः प्रयतते। शुभाशुभमिश्रभेदेन सुखञ्च दुःखञ्चोभयात्मकञ्चेति तत्र तत्र जन्मसु फलं प्राप्नोति। अपि च, देवयानमार्गेण क्रममुक्तिर्वा ज्ञानेन सद्योमुक्तिर्वा जायते। तथा च, ये ज्ञानिनो न सन्ति, केवलं कर्मिणो भवन्ति तेषां कृते दक्षिणायनमार्ग एव साधीयान्। ते हि देवादियोनिं लब्ध्वापि पुनर्मानवयोनिं प्रतिपद्यन्त इति वेदपुराणानुशासनम्।

### सन्दर्भसूची


1. ऋग्वेदः, 10.59.6
2. यजुर्वेदः, 12.38
3. ऋग्वेदः,4.26.9
4. कठ. 2.6
5. निरुक्तम्, 13.2.6
6. बृउ, 6.2.16
7. छान्दोग्य, 5.4.9–5.9.2
8. भागवतम्, 6.16.4
9. तत्रैव, 3.31.1
10. महाभारतम्, शान्तिपर्व, 187.27
11. बृउ. 4.4.5
12. ऐब्रा. शाङ्करभाष्यम्
13. वाचस्पत्यम्
14. वाचस्पत्यम्
15. छान्दोग्य. 5.10.7
16. अग्निपुराणम् 203.3–5
17. ब्रह्मपुराणम्, 224.43–46
18. निरुक्तम्, 14.8
19. निरुक्तम्, 14.8
20. तत्रैव, 14.9
21. भागवतम्, 2.2.24–29
22. गीता, 8.24–26


❖ ❖ ❖



# धर्मस्य तत्त्वं निहितं गुहायाम्

*पूनम शर्मा*

मानवसभ्यतायाः विकासेन एव धर्मस्यापि उदयो जातः। मानवस्य परिमिता बुद्धिः प्रारम्भादेव अप्रमेयस्य अपरिमितस्य तत्त्वस्य विषये विचारे प्रवृत्तेति न सन्देहः। अनित्येन नित्यस्य उपलब्धिः इति शास्त्रेषु श्रूयते। अनेन विश्वासेन एव मानवः धर्मं प्रति प्रवर्त्तते। धर्मस्तु क्रियाकलापेन अभिव्यक्तिं लभते। पुरुषसूक्ते प्रथमानां धर्माणां सूचना लभ्यते–

**यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।**

(ऋग्वेदः 10.90.16)

भावानां विचाराणां च प्रकाशनं क्रियासु एव जायते। ताश्च क्रियाः शुद्धरूपाः सत्यः परमात्मनः विभिन्नानि रूपाणि प्रति समर्पिता भवन्ति, यत्र च धर्मस्य अभिधानं भवति। क्रियापक्षस्य वैविध्यं प्रतिसमुदायं दृश्यते। कश्चित् समुदायः मौखिकं कार्यसमूहमेव धर्मं मन्यते, कश्चित् उपकरणसमन्वितं यज्ञं धर्मरूपेण मन्यते, कश्चित् च स्नानादिशुद्धि–कार्यमेव धर्मपदेन आचष्टे। एवमेव धर्मस्य देशानुसारेण कालानुसारेण पात्रानुसारेण च पार्थक्यं प्रतिभाति सर्वत्र। किन्तु सर्वत्र इदमेव साम्यं वर्त्तते यत् अदृष्टं प्रति समर्पणभावो धर्मस्य सारः। अनेन समर्पणेन आचरणस्य शुद्धिः स्वयमेव समापन्ना भवति।

अपि च धर्मं मन्यमानाः, सर्वे सम्प्रदायाः तदनुयायिनश्च पूर्णतायाः शान्तेश्च इच्छुकाः भवन्ति। अत्र सर्वेषां धर्माणाम् एकत्वम् उदेति। यदि बाह्यरूपः आडम्बरः दूरं तिष्ठति, अस्माकम् अन्धत्वं च अपाकृतं भवति, बुद्धिश्च तर्कपूर्णा भवति, तदा धार्मिकः संघर्षः विनष्टः शान्तिपूर्णं च वातावरणं स्वभावतः उदेष्यति।

वैशेषिकदर्शने धर्मशब्देन पदार्थस्य स्वरूपं लक्षणं च ज्ञायते। यथा च प्रशस्तपादः पदार्थधर्मसंग्रहनामके ग्रन्थे धर्मशब्दस्य अर्थं गृह्णाति। तत्त्वदर्शने धर्मस्य अभ्युदयसाधकत्वं निःश्रेयससाधकत्वं च प्रतिज्ञातं भवति। तथा हि कणादः वैशेषिकसूत्रे कथयति–

**यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः।**

(वैशेषिकदर्शनम् 1.1.2)

अत्र प्रश्नः समुदेति–कथं तावत् पदार्थानां स्वरूपज्ञानेन अभ्युदयः निःश्रेयसं वा लभ्येत ? किम् अग्नेः दाहकत्वज्ञानेन जलस्य शैत्यज्ञानेन वा अभ्युदयः ? वस्तुतः मिथ्याज्ञानेन यत्र बन्धनं भवति, तत्र वस्तुनः यथार्थज्ञानेन अवश्यमेव धार्मिकताप्रतिपत्तिः। मानवस्य स्वरूपं मानवत्वं वर्त्तते। तस्य ज्ञानेन कार्योन्वयनेन च नूनं धार्मिकता जायते। कस्यापि सम्प्रदायस्य मानवे यदि मानवत्वविकासः अर्थात् स्वरूपज्ञानं भवति तदा जने जने द्वेषादिविनाशः। मानवत्वं धर्मेण सह जनं जनं योजयति, न तु विच्छेदयति। अत्रैव धर्मस्य तत्त्वं बुद्धिरूपायां गुहायां निहितं वर्त्तते।

यदि धर्मः बाह्याचरणमात्रमेव कल्पितो भवति, तदा आचरणस्य भेदे सर्वत्र विरोधः एव भवति। किन्तु वस्तुतः बाह्यक्रिया आन्तरस्य धर्मस्य सत्यस्य वा अभिव्यक्तिमात्रमेव वर्त्तते। आन्तरं तत्त्वं प्रकाशनकाले पृथक् भवति, किन्तु तत्प्रकाशनमेव न सत्यं वर्त्तते इति स्वीकरणीयम्। बाह्याचरणं विहाय यदि अन्तरतमस्य अनुसंधानं क्रियते तदा धर्मः वास्तविकरूपेण प्रतिभाति। तस्मिन् बुद्धिनिहिते धर्मे मानवमात्रं समानं वर्त्तते इति वस्तुतः धर्मतत्त्वं गुहायां निहितमेव। यत् बहिः प्रतीयते, नासौ वास्तविको धर्मः।

❖ ❖ ❖



# मतुप्-प्रत्ययस्य भाषाशास्त्रीयम् अध्ययनम्

डॉ॰ लक्ष्मीश्वर झा

मतुप् ( मत्, > वत् ) – प्रत्ययः भारतयूरोपीय–भाषा – परिवारस्य अनेकासु भाषासु तद्धित–रूपेण स्वामित्व–वाचकता–प्रयुक्तया प्रयुक्तः दृश्यते, यथा –

ग्रीक–भाषायां मतुप्–प्रत्ययः–**वन्त (VENT)** तुल० वन्त् < वत् < मत् < मतुप् (अ०[1] 5.2.94) खरिवन्त्[2] (KHARIVENT) = प्रभावत्।

जर्मन–भाषायां मतुप्–प्रत्ययः–मुन्त (MUNT) तुल० मन्त् < मत् < मतुप् (अ० 5.2.94)[1], ह्लिउमुन्त्[3] (HLIUMUNT) = श्रीमत्।

हित्ती–भाषायां मतुप्–प्रत्ययः–वन्त् (WANT) तुल० वन्त् < वत् < मत् < मतुप् (अ० 5.4.94)[1], दश्शुवन्त्[4] (DASSU-WANT) = बलवत् ।

ईरानी ( अवेस्ता ) भाषायां मतुप्–प्रत्ययः–मन्त् (MANT) तुल० मन्त् < मत् < मतुप् (अ० 5.2.94)[1] मदुमन्त्[5] (MADU-MANT) तुल० मधुमन्तः (ऋ० 1.135.1) वन्त् (WANT) तुल० वन्त् < वत् < मतुप् (अ० 5.2.94)[1]। पुथ्रवन्त्[5] (PUOREWANT) तुल० पुत्रवते (यजु० तै० 2.2.4.4)।

## संस्कृतभाषायां मतुप्-प्रत्ययः

संस्कृते प्रायः 785 सानुबन्धाः प्रत्ययाः[6] दृश्यन्ते। तेषु मतुप्–प्रत्ययः अधोलिखितेषु अर्थेषु केवलं प्रातिपदिकेभ्यः विहितः भूत्वा नामपदं (प्रातिपदिकम्) रचयति –

1. (क) अस्मिन् देशे अस्ति – तदस्मिन्नस्तीति देशे तन्नाम्नि (अ० 4.2.67)। मधु अस्मिन् देशे अस्ति इति मधु–सु+मतुप् (अ० 4.2.86)[7] = मधुमान् नाम देशः। कुमुदाः अस्मिन् देशे सन्ति इति कुमुद–जस् + ड्मतुप् (अ० 4.2.87)[8]=कुमद्वान् नाम देशः।

(ख) अस्यां नद्याम् अस्ति – नद्यां मतुप् (अ० 4.2.85)। उदुम्बराः अस्यां नद्यां सन्ति इति उदुम्बर–जस् + मतुप् (अ० 4.2.85)[9] = उदुम्बरवती नाम नदी।

2. निर्वृत्तम् :– तेन निर्वृत्तम् (अ० 4.2.68) मधुना निर्वृत्ता नगरी इति मधु – टा + मतुप् (अ० 4.2.86)[7] = मधुमती नाम नगरी।

3. निवासः – तस्य निवासः (अ० 4.2.69) मधूनां निवासः देशः इति मधु–आम् + मतुप् (अ० 4.2.86)[7] = मधुमान् नाम देशः।

4. अदूरभवः – अदूरभवश्च (अ० 4.2.70) मधोः अदूरभवं नगरम् इति मधु – ङस् + मतुप् (अ० 4.2.86)[7] = मधुमत् नाम नगरम्।

5. आसाम् उपधानो मन्त्रः – तद्वनासामुपधानो...... (अ० 4.4.125) मूर्धन्वान् मन्त्रः आसाम् इष्टकानां इति मूर्धन्वत् – सु + मतुप् (अ० 4.4.127)[10] = मूर्धन्वत्यः।

6. अस्य अस्ति – अस्त्यर्थे – तदस्यास्त्यस्मिन्निति मतुप् (अ० 5.2.94)[1]। बहवः गावः सन्ति इति गो – जस् + मतुप् (अ० 5.2.94)[1] = गोमान् देवदत्तः।

7. अस्मिन् अस्ति = अस्त्यर्थे – तदस्यास्त्यस्मिन्निति मतुप् (अ० 5.2.94)[1]। बहवः गावः अस्मिन् सन्ति इति गो–जस्+मतुप् (अ० 5.2.94)[1] = गोमान् प्रदेशः।

अस्मिन् लघुशोधपत्त्रे अस्त्यर्थे[1] विहितस्य मतुप्प्रत्ययस्य भाषाशास्त्रीयम् अध्ययनं क्रियते।

संस्कृते स्वामित्ववाचकः अस्त्यर्थकः[1] तद्धितसञ्ज्ञकः मतुप्–



प्रत्ययः प्रचुरतया प्रयुक्तः अस्ति। अस्य उद्भवः ऋग्वेदे एव दृश्यते, विकासश्च सर्वत्र दरीदृश्यते।

एषः मतुप्–प्रत्ययः सम्प्रति उपलब्धसंस्कृतसाहित्यस्य अधोलिखितेषु प्रमुखेषु काव्यग्रन्थेषु सर्वथा नूतनेभ्यः प्रायः 1,400 प्रातिपदिकेभ्यः विहितः मिलति —

ऋग्वेदे 259, सामवेदे1, अथर्ववेदे 98, यजुर्वेदे 138, ब्राह्मणग्रन्थेषु 158, आरण्यकग्रन्थेषु 5, उपनिषत्सु 104, वेदाङ्गेषु 138, महाभारते 145, रामायणे 44, अश्वघोषीयग्रन्थेषु 18, भासनाटकचक्रे 9, कालिदासीयग्रन्थेषु 54, जातकमालायाम् 5, पञ्चतन्त्रे 7, मृच्छकटिके 2, कुन्दमालायाम् 2, मुद्राराक्षसे1, भर्तृहरिशतकत्रये 2, किरातार्जुनीये 14, वासवदत्तायाम्1, बाणभट्टीयग्रन्थयोः 14, प्रियदर्शिकायाम्1, दशकुमारचरिते 9, भट्टिकाव्ये 32, शिशुपालवधे 10, भवभूतिरूपकेषु 8, अनर्घराघवे 4, अमरुकशतके 3, विद्धशालभञ्जिकायाम् 5, भागवतपुराणे 21, नलचम्पवाम् 5, रामायणचम्पवाम् 3, नवसाहसाङ्कचरिते 8, कथासरित्सागरे 28, विक्रमाङ्कदेवचरिते 2, प्रबोधचन्द्रोदये1, आर्यासप्तशत्याम्1, राजतरङ्गिण्याम् 6, गीतगोविन्दे1, नैषधीयचरिते च 10 सर्वथा नवीनेभ्यः प्रातिपदिकेभ्यः मतुप्–प्रत्ययः विहितः दृश्यते।

उपरिलिखितेभ्यः काव्यग्रन्थेभ्यः बहिरपि प्रायः सर्वेषु ग्रन्थेषु मतुप्प्रत्ययः प्रचुररूपेण प्रयुक्तः मिलति, किन्तु तत्र नूतनेभ्यः प्रातिपदिकेभ्यः विहितः न दृश्यते।

मतुप्प्रत्ययः यदा प्रातिपदिकेभ्यः विहितः भवति, तदा मतुपः तकारोत्तरवर्तिनोः उकारपकारयोः लोपः [11] भवति। केवलं मत् इति अवशिष्यते। पकारः अनुबन्धः अनुदात्तस्वरार्थं[12] भवति, तथा च उकारः अनुबन्धः उगित्[13]कार्यार्थं भवति।

मतुप्प्रत्ययः यदा मकारान्तेभ्यः अवर्णान्तेभ्यः अवर्णोपधेभ्यः झयन्तेभ्यः[14] तथा च सञ्ज्ञा–विषये[14] अपि च वेदे इकारान्तेभ्यः रेफान्तेभ्यश्च[14] प्रातिपदिकेभ्यः विहितः भवति, तदा मतुपः मकारस्य

स्थाने वकारादेशः[14] भवति, किन्तु यवादिभ्यः[14] (आकृतिगणेभ्यः) प्रातिपदिकेभ्यः अयं वकारादेशः न भवति।

सम्प्रति मतुप्प्रत्ययस्य अयं मकारः प्रायः 250 प्रातिपदिकेभ्यः एव सुरक्षितः दृश्यते, अवशिष्टेभ्यः प्रायः 1150 प्रातिपदिकेभ्यः मतुपः मकारस्य स्थाने वकारादेशः दृश्यते।

मतुप्प्रत्ययः पुंल्लिङ्गे मान्/वान् (यथा–गोमान्/धनवान्), स्त्रीलिङ्गे मती/वती (यथा–गोमती/धनवती), नपुंसके मत्/वत् (यथा–गोमत्/धनवत्) रूपेण प्रयुक्तः दृश्यते।

मतुप्प्रत्ययविधानस्य अन्वाख्यानं व्याकरणेषु पाणिनीयेषु पाणिनीयेतरेषु च सर्वेषु व्याकरणग्रन्थेषु कृतम् अस्ति।

पाणिनेः सानुबन्धस्य मतुप्प्रत्ययस्य कृते पाणिनीयेतरेषु व्याकरणेषु–

1. शर्ववर्मणः कातन्त्रव्याकरणे[15] – मन्त्/वन्त्
2. देवनन्दिनः जैनेन्द्रव्याकरणे[16] – मतु
3. चन्द्रगोमिनः चान्द्रव्याकरणे[17] – मतुप्
4. शाकटायनस्य शाकटायन–व्याकरणे[18] – मतु
5. भोजस्य सरस्वतीकण्ठाभरणे[19] – मतुप्
6. हेमचन्द्रस्य सिद्धहेमशब्दानुशासने[20] – मतु
7. मलयगिरेः मलयगिरिशब्दानुशासने[21] – मतु
8. अनुभूतिस्वरूपाचार्यस्य सारस्वतव्याकरणे[22] – मतु
9. बोपदेवस्य मुग्धबोधव्याकरणे[23] – मतु दृश्यते।

पाणिनीयव्याकरणे प्रायः 286 तद्धितसञ्ज्ञकाः प्रत्ययाः उल्लिखिताः दृश्यन्ते। तेषां मध्ये स्वामित्वबोधकस्य विधायकानि सूत्राणि अधोलिखितानि सन्ति —

**1. तदस्यास्त्यस्मिन्निति मतुप् (अ० 5.2.94)**

अस्य सूत्रस्य इयं महती विशेषता अस्ति यत् अत्र प्रकृतिः, प्रत्ययार्थः प्रत्ययश्च इति त्रयाणाम् उल्लेखः कृतः सूत्रकारेण।



इदं सूत्रं मतुप्प्रत्ययस्य विधानस्य सामान्यं सूत्रम् अस्ति। अनेन सूत्रेण मतुप्प्रत्ययान्ताः प्रचुराः प्रयोगाः निष्पद्यन्ते। सम्प्रति संस्कृतवाङ्मयस्य प्रमुखेषु काव्यग्रन्थेषु प्रायः 1,400[24] प्रातिपदिकेभ्यः मतुप्प्रत्ययः विहितः दृश्यते।

**2. रसादिभ्यश्च (अ० 5.2.95)**

तदस्यास्त्यस्मिन्निति मतुप् (अ० 5.2.94) इति सूत्रे सति रसादिभ्यश्च (अ० 5.2.95) इति सूत्रस्य रचनायाः प्रयोजनम् इदम् अस्ति यत् इन्द्रियग्राह्येभ्यः गुणवाचकेभ्यः रसादिभ्यः मतुप्प्रत्ययं विहाय अन्ये इनिप्रभृतयः मत्वर्थीयाः न भवन्तु। यथा –

रसवान् (ऋ० 6.47.1), रूपवन्तः (अथर्व० पै० 16.139.27)।

**3. बलादिभ्यो मतुबन्यतरस्याम् (अ० 5.2.136)**

तदस्यास्त्यस्मिन्निति मतुप् (अ० 5.2.94) इति सूत्रे सति बलादिभ्यो मतुप्....... (अ० 5.2.136) इति सूत्रस्य रचनायाः प्रयोजनम् इदम् अस्ति यत् बलादिभ्यः मतुप् तथा च इनिः भवताम्, ठन् (अ० 5.2.115) न भवतु। यथा —

बलवत् (ऋ० 10.145.1), उत्साहवता (पञ्च० 2.6.145–146)।

तदस्यास्त्यस्मिन्निति मतुप् (अ० 5.2.94) इत्यनेन सूत्रेण मतुप्प्रत्ययस्य अर्थः भवति—'अस्य अस्ति' अथवा 'अस्मिन् अस्ति'। मतुप्प्रत्ययस्य अनयोः अर्थयोः ये ये तद्धित–सञ्ज्ञकाः प्रत्ययाः प्रातिपदिकेभ्यः विहिता भवन्ति, ते ते मत्वर्थीयाः अभिधीयन्ते। मत्वर्थीयाः प्रत्ययाः अक्षरक्रमेण अग्रलिखिता 52 सन्ति – –

अ, अच्, अण्, आटच्, आमिनच्, आरकन्, आलच्, इ, इनच्, इनि, इरच्, इरन्, इलच्, ई, ईमसच्, ईरच्, ईरन्, उरच्, ऊल्, ख, ग्मिनि, घ, चालु, चेलु, छ, ञ, ठञ्, ठन्, ण, त, तप्, ति, तु, न, ब, भ, म, मतुप्, मिनि, यत्, यप्, यल्, यस्, र, लच्, व, वनिप्, वलच्, विनि, वुन्, श।

'अस्य अस्ति' अथवा 'अस्मिन् अस्ति' इति एतौ मतुप्प्रत्ययस्य सामान्यौ अर्थौ स्तः। मतुप्प्रत्ययः यदा प्रातिपदिकेभ्यः विहितः भवति, तदा प्रायः अधोलिखित भूमादयः[25] विशिष्टार्थाः अपि द्योत्यन्ते —

भूम्नि :— बहवः गावः अस्य सन्ति इति गो–जस् + मतुप् = गोमान् (ऋ० 4.2.5)।

निन्दायाम् :— निन्दितौ हनू अस्य स्तः इति हनु–औ + मतुप् = हनुमान् (रामरहस्योप० 1.5)

प्रशंसायाम् :— प्रशस्तं रूपम् एषाम् अस्ति इति रूप–सु + मतुप् = रूपवन्तः (अथर्व० पै० 16.139.27)

नित्ययोगे :— क्षीरं नित्यमेव अस्य अस्ति इति क्षीर–सु + मतुप् = क्षीरवान् (अथर्व० शौ० 18.4.16)।

अतिशायने :— अतिशयितः नितम्बः अस्याः अस्ति इति नितम्ब – सु + मतुप् = नितम्बवती (विक्र० 4.49)

संसर्गे :— दण्डसंसर्गः अस्य अस्ति इति दण्ड–सु –मतुप् = दण्डवद्भिः (काश्रौ० 26.4.1)।

अस्ति–विवक्षायाम् :— गन्धः अस्याः अस्ति इति गन्ध–सु + मतुप् = गन्धवती पृथिवी (तर्कसंग्रहः)

यवः अस्याः अस्ति इति यव – सु + मतुप् = यवमतीभिः (यजु० मै० 3.8.9; 9.3)।

उपरिलिखिताः भूमादयः विशेषार्थाः विवक्षाधीना भवन्ति।

मतुप्प्रत्ययः प्रथमान्तेभ्यः प्रातिपदिकेभ्यः विहितः भवति, किन्तु सप्तम्यन्तात् प्रातिपदिकात् अपि विहितः दृश्यते, यथा अप्सुमत् (यजु० मै० 2.1.9), अप्सुमतीः (यजु० मै० 3.4.6), अप्सुमतीभ्याम् (यजु० मै० 3.4.4), अप्सुमतीम् (यजु० मै० 4.5.3), तुल० अप् + मतुप् = अप्वान् चरुः (अथर्व० शौ० 18.4.24)।

मतुप्प्रत्ययः यदा प्रातिपदिकेभ्यः विहितः भवति, तदा



प्रातिपदिकानाम् अवयवभूतस्य सुपः लोपः भवति, किन्तु साहित्ये द्वयोः स्थानयोः लोपस्य अभावः दृश्यते, यथा —

अप् – सुप् + मतुप् = अप्सुमत् (यजु० मै० 2.1.9)।

ज्योतिस् – औ + मतुप् = ज्योतिषीमान् (अथर्व० शौ० 18.4.14)।

तसौ मत्वर्थे (अ० 1.4.19) सूत्रानुसारेण मतुप्प्रत्यये परे सति सकारान्तं प्रातिपदिकं भसञ्ज्ञकं भवति, अतः अत्र पदसञ्ज्ञाजन्यं कार्यं न भवति, किन्तु साहित्ये अस्य नियमस्य अपवादोऽपि दृश्यते, यथा —

चेतोमन्ति (महाभा० 3.8676), तपोवत्सु (महाभा० 12.8548), यशोमती (हर्षच० 4.207.12), मनोवती (कथा० 4.2.136)।

मतुप्प्रत्ययान्तात् पुनः मतुप्प्रत्ययः विहितः न भवति, किन्तु साहित्ये अस्य अपवादोऽपि दृश्यते यथा–सरस् + मतुप् + ङीप् = सरस्वती + मतुप् = सरस्वतीवतोः (ऋ० 8.38.10)

प्रत्यये भाषायां नित्यम् (वा० 8.5.45) इति वार्तिकानुसारेण भाषायाम् अनुनासिके प्रत्यये परे सति यरः स्थाने नित्यम् अनुनासिकादेशः भवति किन्तु साहित्ये मतुप्प्रत्यये परे अस्य अभावः अपि दृश्यते, यथा–ककुद् + मतुप् = ककुद्मन्तः (रघु० 4.22)।

वेदे विकल्पेन भवति, यथा — ककुद् + मतुप् = ककुद्मान् (ऋ० 10.8.2), ककुन्मान् (यजु० मा० 9.6)।

मतुप्प्रत्ययान्तानि पदानि प्रायः विशेषणानि भवन्ति, किन्तु साहित्ये सञ्ज्ञारूपेण अपि प्रचुराणि पदानि दृश्यन्ते, यथा–कक्षीवान् (ऋ० 1.26.2) = ऋषि–विशेषः, वृचीवन्तः (ऋ० 6.27.6) = वरशिखस्य पुत्राः, सरस्वान् (ऋ० 10.66.5) = देवविशेषः। मतुप्–प्रत्ययान्तानि यानि पदानि प्रारम्भिककाले विशेषणानि आसन्, उत्तरोत्तरकाले तानि एव पदानि सञ्ज्ञारूपेण प्रयुक्तानि दृश्यन्ते।

## मतुप्प्रत्ययस्य लुक् अपि भवति

**1. यत्प्रत्यये परे मतुपः लुक् (अ० 4.4.125)**

वर्चस्वान् उपधानः मन्त्रः आसाम् इष्टकानाम् इति वर्चस्वत्

(< वर्चस् + मतुप् अ० 5.2.94 )–सु + यत् ( अ० 4.4.125 < 4.4.75 ), मतुपः लुक् ( अ० 4.4.125 ) = वर्चस्याः ( यजु० मै० 4.4.2; 4 ) इष्टकाः।

**2. अण्प्रत्यये परे मतुपः लुक् ( अ० 4.4.26 )**

अश्विमान् उपधानः मन्त्रः आसाम् इष्टकानाम् इति अश्विमत् ( <अश्विन् + मतुप् अ० 5.2.94 ) – सु + अण् ( अ० 4.4.126 ), मतुपः लुक् ( अ० 4.4.26 ) = आश्विनीः ( यजु० तै० 5.3.1.1 ) इष्टकाः उपदधाति।

**3. मतुप्प्रत्यये परे मतुपः लुक् ( अ० 4.4.127 )**

मूर्धन्वान् उपधानः मन्त्रः इष्टकानाम् इति मूर्धन्वत् (< मूर्धन् + मतुप् अ० 5.2.94 ) – सु + मतुप् ( अ० 4.4.127 ), पूर्ववर्तिनः मतुपः लुक् ( अ० 4.4.127 ) = मूर्धन्वतीः ( यजु० तै० 5.3.1.5 ) इष्टकाः उपदधाति।

**4. गुणवाचिभ्यः प्रातिपदिकेभ्यः मतुपः लुक् ( वा० 5.2.94.3 )[26]**

शुक्लः गुणः अस्य अस्ति इति शुक्ल–सु + मतुप् ( अ० 5.2.94 ), मतुपः लुक् ( अवा० 5.2.94.3 ) = शुक्लः पटः।

**5. इष्ठन्प्रत्यये परे मतुपः लुक् ( अ० 5.3.65 )[27]**

अयम् एषाम् अतिशयेन ब्रह्मवान् इति ब्रह्मवत् ( < ब्रह्मन् – सु + मतुप् अ० 5.2.94 ) – सु + इष्ठन् ( अ० 5.3.55 )[28], मतुपः लुक् ( अ० 5.3.65 )[27] = ब्रह्मिष्ठ < ब्रह्मिष्ठम् ( रघु० 18.28 )

**6. ईयसुन्प्रत्यये परे मतुपः लुक् ( अ० 5.3.65 )[27]**

अयम् अनयोः अतिशयेन बलवान् इति बलवत् ( बल – सु + मतुप् अ० 5.2.94 ) – सु + ईयसुन् ( अ० 5.3.57 )[29], मतुपः लुक् (अ० 5.3.65)[27]= वलीयस् > बलीयसे ( अथर्व० शौ० 3.29.3 )।

**7. णिच् - नामधातुप्रत्यये परे मतुपः लुक्**

कुसुमवतीः कुर्वन् इति कुसुमवत् ( < कुसुम – मतुप् अ० 5.2.94 )– ङीष् – शस् + णिच्[30], मतुपः लुक्[31], लट् > शतृ = कुसुमयन् (शिशु० 6.62)।



**मतुपः नुट्-आगमः भवति**

वैदिकसाहित्ये अनन्तात् प्रातिपदिकात् उत्तरस्य मतुपः नुट् > न् – आगमः भवति, यथा–अक्षण्वन्तः (ऋ० 10.71.7), अस्थन्वन्तम् ( ऋ० 1.164.4), उदन्वता (ऋ० 5.83.7 ), दधन्वतः ( ऋ० 6.48.16 ) मूर्धन्वती ( यजु० तै० 2.6.22 ), शीर्षन्वान् ( यजु० तै० 5.4.11.1 )।

मतुप्प्रत्ययस्य सर्वाधिका महती विशेषता इयम् अस्ति यत् अयं प्रत्ययः अद्यापि जनैः प्रायः सर्वासु आधुनिकभारतीयभाषासु प्रचुररूपेण प्रयुक्तः क्रियते, दृश्यते च।

**सन्दर्भसूची**

1. तदस्यास्त्यस्मिन्निति मतुप् ( अ० 5.2.94 ), तुल० अस्त्यर्थे मतुः ( सारस्वतव्याकरण ), मतुरस्त्यर्थे ( मुग्धबोधव्याकरण )।
2. टी. बरो–संस्कृत भाषा (अनूदित), पृ० 175.
3. टी. बरो–संस्कृत भाषा (अनूदित), पृ० 166.
4. टी.–बरो संस्कृत भाषा (अनूदित), पृ० 174.
5. डॉ० भोलाशंकर व्यास – संस्कृत का भाषाशास्त्रीय अध्ययन, पृ०142
6. सनादयाः 12 + कृतः 115 + उणादयः 325 + तिङः 18 + सुपः 21 + स्त्री 8 + तद्धिताः 286 = 785 प्रत्ययाः।
7. मध्वादिभ्यश्च ( अ० 4.2.86 )।
8. कुमुदनडवेतसेभ्यो ड्मतुप् (अ० 4.2.87)।
9. नद्यां मतुप् (अ० 4.2.85)।
10. वयस्यासु मूर्ध्नो मतुप् (अ० 4.4.127)।
11. उपदेशेऽजनुनासिक इत् ( अ० 1.3.2 ) इति सूत्रेण मतुप उकारस्य तथा च हलन्त्यम् ( अ० 1.3.3 ) इति सूत्रेण पकारस्य इत्सञ्ज्ञा, तस्य लोपः ( 1.3.9 ) इति सूत्रेण इत्सञ्ज्ञकयोः लोपः।
12. अनुदात्तौ सुप्पितौ ( अ० 3.1.4 ),अपवादाः – द्र० अ० 6.1.172, 215.
13. उगिदचां सर्वनामस्थानेऽधातोः ( अ० 7.1.70 ), उगितश्च ( अ० 4.1.6 )।

14. मादुपधायाश्च मतोर्वोऽयवादिभ्यः (अ० 8.2.9), झयः (अ० 8.2.10), सञ्ज्ञायाम् (अ० 8.2.11), छन्दसीरः (अ० 8.2.15)।
15. तदस्यास्तीति मन्त्वनित्वन्निन् (कातन्त्र० 2.6.15)।
16. तदस्यास्त्यस्मिन्निति मतुः (जैनेन्द्र० 4.1.23)।
17. तदस्यास्त्यत्रेति मतुप् (चान्द्र० 4.2.98)।
18. अस्त्यस्मिन्चेति मतुः (शाकटायन० 3.3.116)।
19. तदस्यास्त्यस्मिन्निति मतुप् (सरस्वती० 5.2.127)।
20. तदस्याऽस्त्यस्मिन्निति मतुः (सिद्धहेम० 7.2.1)।
21. तदस्याऽस्त्यस्मिन् वेति मतुः (मलयगिरि० 7.1)।
22. अस्त्यर्थे मतुः (सारस्वत०)
23. मतुरस्त्यर्थे (मुग्धबोध०)
24. द्रष्टव्या अस्य शोधपत्त्रस्य पृ० सं० – 3
25. भूमनिन्दाप्रशंसासु, नित्ययोगेऽतिशायने। संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः।। (मभा० 5.2.94)
26. गुणवचनेभ्यो मतुपो लुग्वक्तव्यः (अवा० 5.2.94.3)।
27. चिन्मतोर्लुक् (अ० 5.3.65)।
28. अतिशायने तमबिष्ठनौ (अ० 5.3.55)।
29. द्विवचनविभज्योपपदे तरबीयसुनौ (अ० 5.3.57)।
30. तत्करोति तदाचष्टे (चुरादिगणीयं गणसूत्रम्)।
31. विन्मतोर्लुक् (अ० 5.3.65) < प्रातिपदिकाद् धात्वर्थे बहुलमिष्ठवच्च (चुरादिगणसूत्रम्)
32. अनो नुट् (अ० 8.2.16)।

❖ ❖ ❖



# योगवासिष्ठस्योत्पत्तिप्रकरणे 'मनः'

प्रतिमा परमारः

संस्कृतवाङ्मये विविधेषु पुराणेषु दार्शनिकतत्त्वानां व्यापको गम्भीरश्च समावेशोऽस्ति। योगवासिष्ठस्य गणना पुराणेषु कर्तुं शक्यते, परन्तु तत्र पुराणानां सामान्यचरित्रस्य अभावो दृश्यते। अत्र वेदान्तदर्शनस्य कारणात्मकः एकत्ववादः सम्यग् विविच्यमानो दृश्यते।

योगवासिष्ठम् आमूलान्तम् एको दार्शनिको ग्रन्थो विद्यते। तथापि श्लोकैः बद्धेऽस्मिन् ग्रन्थे काव्यधर्मः सम्यक् संयोजितो दृश्यते। प्रायः प्रत्येकं श्लोकः उत्तमस्य काव्यप्रतिनिधिः वर्तते। शब्दानां चयनमपि अतीव सुन्दररीत्या कृतं विद्यते।

योगवासिष्ठम् अजातवादस्य ब्रह्मवादस्य वा ग्रन्थः अस्ति। एतदनुसारं चेतनात् परब्रह्मणम् अतिरिच्य अपरा काऽपि सत्ता नास्ति। योगवासिष्ठस्य उत्पत्तिप्रकरणे कथितमस्ति यत् सम्पूर्णस्य जगतः शरीरं 'मनः' एवाऽस्ति। मनः आद्या शक्तिः .........

**अध्यात्मा चाऽस्ति। एतत् कदापि न नश्यति।**[1]

ज्ञानस्याधिकरणमेव 'आत्मा'ऽस्ति। आत्मा सर्वेषां द्रष्टा, सर्वेषां भोक्ता, सर्वज्ञः, नित्यः सर्वव्यापी चाऽस्ति। बाह्येन्द्रियैः आत्मा प्रत्यक्षं न भवति। मानसिकं प्रत्यक्षमपि सर्वे न स्वीकुर्वन्ति। अत एव इच्छा–द्वेष–प्रयत्नसुख–दुःख–ज्ञानरूपैः लिङ्गैः आत्मनः अस्तित्वम् अनुमीयते, हितस्य प्राप्तये अहितस्य विनाशाय च क्रियमाणा क्रिया 'चेष्टा' इति कथ्यते। यत्र इयं चेष्टा भवति अथवा यत्रेन्द्रियाणि तिष्ठन्ति अथवा यत्र जीवात्मा

सुखदुःखे अनुभवति, तत् 'शरीरम्'। एतच्च 'भोगायतनम्' इत्यपि कथ्यते। तत्र इन्द्रियं द्विविधम्–(1) बाह्येन्द्रियम्, (2) अन्तरिन्द्रियम्।

बाह्येन्द्रियं विभज्यते – (1) पञ्च कर्मेन्द्रियाणि–वाक्–पाणि–पाद–पायूपस्थानि, (2) पञ्च ज्ञानेन्द्रियाणि–चक्षुः–श्रोत्र–रसना–घ्राण–त्वचः अन्तरिन्द्रियम् एकं 'मनः' इति । ज्ञानेन्द्रियैः क्रमशः रूप–शब्द–रस–गन्ध– स्पर्शेति पञ्चमहाभूतगताः पञ्चगुणाः गृह्यन्ते।

अन्तरिन्द्रियेण मनसा सुख–दुःखेच्छा–द्वेषादयः आत्मगुणाः गृह्यन्ते। मनः अणुपरिमाणं भवति। अतः मनः एकस्मिन् काले एकस्मिन्नेव स्थाने तिष्ठति। मनसः सम्बन्धं विना केनचिदपि इन्द्रियेण किमपि ज्ञानं नोत्पद्यते। अतः एकस्मिन् काले एकमेव ज्ञानम् उत्पद्यते।

मनः नित्यमस्ति। एकस्मिन् शरीरे एकं मनः तिष्ठति। मृत्युकाले एतत् शरीरात् बहिः निःसरति। एतत् 'उपसर्पणं' कथ्यते। वस्तुतः मनसः निष्क्रमणमेव 'मरणम्' अस्ति। एतत् मनः अपरस्मिन् शरीरे प्रविशति। तच्च 'अपसर्पणं' कथ्यते। मोक्षदशायामपि जीवात्मना सह मनः एव तिष्ठति। मन एव मोक्षावस्थायाम् एकम् आत्मानम् अपरस्मात् आत्मनः (जीवात्मनः) पृथक्करोति। तेन च जीवात्मा परमात्मा च भिन्नतया परिचीयते। एतेन कारणेनैव न्यायमतेन मोक्षावस्थायामपि आत्मा अनेको वर्तते।

भारतीयदर्शनानुसारं 'मान्यतेऽनेन इति मनः'। अहं सुखी अहं दुःखी इत्यादिसुखदुःखसाक्षात्कारः एतेनैव इन्द्रियेण मन्यते क्रियते वा। अतः 'सुखाद्युपलब्धिसाधनमिन्द्रियं मनः' इति मनसः लक्षणं स्पष्टं भवति।

गीतायां मनः चञ्चलं प्रमाथि बलवत् दृढ़ं तथा च वायुरिव सुदुष्करं दुर्निग्रहम् इति प्रोक्तमस्ति –

**असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।**
**अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥**[2]

योगवासिष्ठस्यानुसारम् इदं मनः न तु जड़ं न च चेतनमस्ति



यतो हि चित् अचित् इति उभयरूपतायां सत्यामेतत् अन्यतरं भवितुं न शक्नोति। 'मन्वानो मनः' इति श्रुत्या अजड़ा दृष्टिः चित् वा उपाधेः मलिनतया 'मनः' इति कथ्यते –

**मनो हि न जडं राम नापि चेतनतां गतम् ।**
**म्लानाऽजडा तदा दृष्टिर्मन इत्येव कथ्यते ॥**[3]

मनोयुक्तेन प्राणिना शुभमशुभं वा श्रुत्वा, स्पृष्ट्वा, दृष्ट्वा भुक्तवा घ्रात्वा च अन्तःकरणे हर्षो विषादो वाऽनुभूयते।[4] रूपस्य ग्रहणे प्रकाशः यथा कारणं भवति तथा सर्वेषां पदार्थानां कारणं मन एवाऽस्ति।[5]

मनसः कर्म मन एवाऽस्ति। शरीरे तदेव कारणम्, शरीरे तत् उत्पद्यते, शरीरे एव विनश्यति, यतो हि आत्मनि जन्ममरणादिगुणाः न सन्ति।[6]

समुद्रे तरङ्ग इव शरीरे मनः उत्पद्यते –

**अतन्मयं तन्मयं च तरङ्गः सागरादिव ।**[7]

योगवासिष्ठानुसारं मनः क्षणं कल्परूपेण कल्पं च क्षणरूपेण परिवर्त्तयितुं शक्नोति। अतः देशकालक्रमं मनोऽधीनं वदन्ति –

**कल्पं क्षणीकरोत्यन्तः क्षणं नयति कल्पताम् ।**
**मनस्तदायत्तमतो देशकालक्रमं विदुः ॥**[8]

मनसः एतावता स्वरूपेण इदं तात्पर्यं संक्षेपेण अवगन्तुं शक्यते–

1. सूक्ष्मात् मनसः स्थूलं जगत् उत्पद्यते।
2. परमात्मा अपरो जीवात्मा चेति आत्मनः द्विविधस्थितिवत् मनसोऽपि रूपद्वयं स्यात् – (1) परं मनः, (2) जीवगतं मनः।
3. परं मनः सम्पूर्णस्य जगतः कारणम्, जीवगतं मनः विविधविषयाणां कल्पनायाः आधारः।

अतः सम्पूर्णसंसारस्य सृष्टिः भवतु अथवा कस्यचित् पदार्थस्य चिन्तनं भवतु, उभयतः मनः एव कारणं भवति–आदौ परं मनः, अपरत्र च जीवगतं मनः इति।

सन्दर्भसूची
1. योगवासिष्ठम्, उत्पत्तिप्रकरणम् 102/17
**मनो राम शरीरं हि जगतः सकलस्य च ।**
**आद्या शक्तिश्चिदध्यात्मा न नश्यति कदाचन ॥**

2. गीता,6/34

3. योगवासिष्ठम् (यो० वा०), उत्पत्तिप्रकरणम् (उ० प्र०) 96/37

4. यो० वा०, उ० प्र० 96/58
**श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा शुभाशुभम् ।**
**अन्तर्हर्षं विषादं च समनस्को हि विन्दति ॥**

5. यो० वा०, उ० प्र० 96/59
**आलोक इव रूपाणामर्थानां कारणं मनः ।**

6. यो० वा०, उ० प्र० 97/9
**मनो मन्ये मनः कर्म तच्छरीरेषु कारणम् ।**
**जायते म्रियते तद्धि नात्मनीदृग्विधा गुणाः ॥**

7. यो० वा०, उ० प्र० 100/1

8. यो० वा०, उ० प्र०, 103/14

❖ ❖ ❖



# 'विद्या'भेदविमर्शः

*डॉ० श्रीधर मिश्रः*

'विद्या' शब्दस्य व्युत्पत्तिः शब्दकल्पद्रूमे अनेन प्रकारेण क्रियते– 'विद्यते असौ' इति। विद् धातोः "संज्ञायां समजनिषदनिपत–मनविद्षुञ्शीङ्भृञिणः" (पा० ३/३/९९) इति सूत्रेण क्यप्–प्रत्यये टापि च {विद् + क्यप् + टाप्} विद्याशब्दः निष्पन्नो भवति। अनेन विद्याशब्दस्य 'ज्ञानम्' इति अर्थो गृहीतः। विष्णुपुराणे तु विद्याशब्दस्य प्रयोगः 'शास्त्रे'त्यर्थे क्रियते–

**'अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।**
**धर्मशास्त्रं पुराणञ्च विद्या ह्यष्टादशैव ताः ॥**

**आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः ।**
**अर्थशास्त्रं चतुर्थञ्च विद्या ह्यष्टादशैव ताः ॥'**

(विष्णुपुराणम्, प्रायश्चित्ततत्त्वम्)

अथर्ववेदे परवर्त्तिसाहित्ये च विद्याशब्दः ज्ञानस्य अर्थे प्रयुक्तः।[1] वैदिककोषानुसारेण तैत्तिरीयसंहितायाम् ऐतरेयब्राह्मणे च विशेषतः 'त्रयी'–विद्यायाः उल्लेखः अस्ति। शतपथब्राह्मणे अध्येतव्यपदार्थानां सूचीषु विद्याशब्दः विशिष्टार्थे आगच्छत्।[2] सायणानुसारेण विद्यायाः अर्थः 'दर्शनशास्त्रस्य प्रकाशः' इत्यस्ति। गेल्डनरानुसारेण अयं शब्दः प्राचीनब्राह्मणान् उद्देशयति। बृहदारण्यकोपनषदि विद्याभेदविषये अनौपचारिको विवेकोऽस्ति–

**'ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राणि अनुव्याख्यानानि ॥'**[3]

कठोपनिषदि विद्या श्रेयोविषया अविद्या च प्रेयोविषया इति उल्लेखः विद्यते।[4]

शास्त्रेषु विद्याभेदविषये बह्व्यः मान्यताः दरीदृश्यन्ते। श्रीमद्–भगवद्गीतायाः सर्वेषामध्यायानामन्ते 'ब्रह्मविद्यायां योगशास्त्रे..........इत्यनेन स्पष्टीभवति यत् विद्याभेदे ब्रह्मविद्या अन्यतमा। अर्जुनं प्रति श्रीकृष्णस्य इयमुक्तिः 'अध्यात्मविद्या विद्यानां..........' उपर्युक्ततथ्यस्य समर्थनमस्ति। प्रायशः विद्यायाः रूपद्वयं लक्षितं भवति परा अपरा च। परा विद्या एव ब्रह्मविद्या इति बुधाः।

काव्यमीमांसायाः द्वितीयाध्याये 'आन्वीक्षिकी त्रयी वार्ता दण्डनीति–श्चेति विद्याः'–इत्येताः चतस्रः विद्याः कथ्यन्ते। भारवेः किरातार्जुनीय मल्लिनाथेन एताः चतस्रः विद्याः विवेचिताः, तद्यथा–

**'आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती ।**
**विद्याश्चैताश्चतस्रस्तु लोकसंस्थितिहेतवः ॥'[5]**

मनुस्मृतौ एताभ्यः चतसृभ्यः अतिरिक्ता पञ्चमी आत्मविद्या कथिता–

**आन्वीक्षिकीं चात्मविद्यां वार्तारम्भांश्च लोकतः ॥[6]**

काव्यमीमांसायां विद्यायाः सम्बन्धे विविधविदुषां विभिन्नानि मतानि प्रदर्शितानि सन्ति–

क) उशनोभार्गवानुसारेण दण्डनीतिरेव एका विद्या अस्ति, यतः दण्डस्य भयेन सर्वे जनाः स्व–स्व–कर्त्तव्यपालने रताः सन्ति। कौटिल्यार्थशास्त्रे दण्डनीत्या एव सर्वा विद्याः नियन्त्रिता इत्युक्त्वा उशनसः मतं सहेतुकं प्रस्तुतमास्ते।[7] अनेन कौटिल्यप्रदर्शितहेतुना इदं लक्ष्यते यत् उशनसः पूर्वमपि विद्यायाः भेदाः भिन्नरूपेण प्रचलिताः आसन्। अतएव उशनसो मतमिदमर्वाचीनमेव प्रतीयते।

ख) बृहस्पतिः वार्त्ता दण्डनीतिश्च इति द्वे विद्ये मनुते। अस्यानुसारेण तु 'त्रयी' विदुषाम् अलङ्कारस्वरूपिणी एवास्ति। अतः इयं विद्या भवितुं नार्हति इति कौटिल्येन अर्थशास्त्रे अप्युक्तमस्ति।[8]



अत्र बृहस्पतिनाऽपि मूलविद्यासङ्ख्या नोक्ता किं च त्रय्याः विद्यात्वं खण्डयित्वा एव तन्मतं प्रतिष्ठाप्यते। अतः मतमिदमर्वाचीनमेवास्ति।

ग) मनुसम्प्रदायानुयायिनः त्रयी, वार्त्ता दण्डनीतिश्चेति तिस्रः विद्या मन्यन्ते तत्र हेतुश्चेत्थमस्ति यत् वेदः वार्त्तायाः दण्डनीतेश्च आदेशकः उपेदशकश्च अस्ति–

**'त्रयी वार्त्तादण्डनीतयस्तिस्रो विद्या इति मानवाः ।**
**त्रयी हि वार्त्तादण्डनीत्योरुपदेष्ट्री ।'**

(काव्यमीमांसा, द्वितीयाध्यायः)

घ) आचार्यकौटिल्यस्य मतेन विद्याः चतस्रः एव–आन्वीक्षिकी, त्रयी, वार्त्ता, दण्डनीतिश्चेति। तत्र च प्रमाणैः तर्कैः च विवेचिता 'त्रयी' दण्डनीतिम् आदेष्टुं समर्था अस्ति ।[9]

ऋग्यजुःसामाथर्वाणि वेदाश्चत्वारः, शिक्षा–कल्प–छन्दो–निरुक्त–व्याकरण–ज्योतिषः षडङ्गानि चत्वारि शास्त्राणि च एतानि चतुर्दश 'विद्या'रूपेण, 'विद्यास्थान'–रूपेण वा लोकेषु प्रचलितानि सन्ति। वस्तुतः विद्या–विद्यास्थानयोर्भेदो नास्ति। काशिकाकारस्य 'विद्या' शब्दव्युत्पत्त्याऽपि पुष्टं भवति–

**'विदन्ति अनया इति विद्या ।'[10]**

अनेन 'विद्या'शब्देन वेदादीनि विद्यास्थानान्यपि ग्राह्याणि। प्राचीनविद्वांसः एताः पूर्वोक्ताः चतुर्दशविद्या एव 'विद्यास्थान'रूपेण सम्बोधितवन्तः इति राजशेखरस्योक्त्या अपि प्रतीयते–

**''तानीमानि चतुर्दश विद्यास्थानानि, यदुत वेदाश्चत्वारः षडङ्गानि चत्वारि शास्त्राणि'' इत्याचार्याः ।[11]**

कोषानुसारेण लोकप्रचलितचर्चायाः आधारेण चतुर्दशविद्यानाम् उल्लेखः प्राप्यते, तद्यथा–

**षडङ्गमिश्रिता वेदाः धर्मशास्त्रं पुराणकम् ।**
**मीमांसा तर्कमपि चैता विद्याश्चतुर्दश ॥[12]**

किञ्च,

**निर्बन्धसञ्जातरुषाऽर्थकार्श्यमचिन्तयित्वा गुरुणाऽहमुक्तः ।**
**वित्तस्य विद्यापरिसङ्ख्यया मे कोटीश्चतस्रो दश चाहरेति ॥**[13]

इत्यत्र महाकविना वर्णितं यत् कौत्सशिष्यः वरतन्तुः विद्या–सङ्ख्यानुसारेण चतुर्दशकोटिमुद्रा आनेतुं गुरुणादिष्टः। मल्लिनाथेन च स्वटीकायाम् एतद्विद्यासङ्ख्यायाः पुष्टिः कृता ।[14]

निष्कर्षतः विद्यायाः विद्यास्थानस्य वा भेदानां सम्बन्धे यथाविवेचितं चतस्रः मान्यताः बहुप्रचलिताः सन्ति।

अ) केषाञ्चन विदुषां मतेन आन्वीक्षिकी, त्रयी, वार्त्ता दण्डनीतिश्च इत्येताः चतस्रः एव विद्याः सन्ति।

आ) अन्ये केचन यथोक्तान् चतुर्दशभेदान् स्वीकुर्वन्ति।

ई) केचिद् विद्वांसः वार्त्ता–कामसूत्र–शिल्पशास्त्रदण्डनीति इत्येतानि चत्वारि विद्यास्थानानि मेलयित्वा अष्टादशविद्याः मन्यन्ते ।

ई) अन्ये च वैदिकाः परा अपरा चेति विद्यायाः भेदद्वयं कुर्वन्ति।

एतासु चतसृषु ऋग्यजुःसामवेदरूपिणः 'त्रय्याः' ग्रन्थत्रयस्य विद्यात्वं सामान्यतः सर्वत्र गृहीतमस्ति। अतः विद्याभेदरूपेण त्रय्याः मान्यता सर्वप्राचीना विद्यते। कालक्रमानुसारेण शास्त्राणां रचनया विद्यायाः सङ्ख्यायां वृद्धिः अभवत्, ते च विद्याभेदाः पूर्वोक्तरूपेण विभिन्नाः भूत्वा काव्यमीमांसायां कथितान् अष्टादशभेदान् यावत् प्रचलिताः जाताः। उशनोभार्गवादीनां प्रचलितमान्यताः एकाङ्गितया अग्राह्यमिति मया विवेचितम्। परन्तु एतासु विवेचितमान्यतासु लोकव्यवहारे मध्यकाले आधुनिककाले च उपर्युक्ताः विद्यायाः चतुर्दशभेदा एव ग्राह्याः सन्तीति शम्।

**सन्दर्भ-सूची :-**


१. अथर्ववेदः, ६/११६/१, ११/७/१०, ११/८/३,
२. तैत्तिरीयसंहिता, ५/१/७/२,
ऐ० ब्रा०, ८/२३/८/६,





श० ब्रा०, २१/५/६/८,
३. बृहदारण्यकोपनिषद्, २/४/१०,
४. कठोपनिषद्, १/२/४,
५. घण्टापथः, किराता०, २/६,
६. मनुस्मृतिः, ७/४३,
७. कौटिल्यः, अर्थशास्त्रम्, १/२/६–७,
८. तथैव, १/२/५,
'संवरणमात्रं हि त्रयी लोकयात्राविदः इति ।'
९. तुलनीयः– अर्थशास्त्रस्य प्रथमप्रकरणे द्वितीयाध्यायः–
'आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्चेति विद्याः'।।१।।
काव्यमीमांसायां द्वितीयाध्यायः–
'आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्चेति विद्याः।'
१०. काशिका, पा० ३/३/९९,
११. काव्यमीमांसा, द्वितीयाध्यायः
१२. वामन शिवराम आप्टे, छात्र–संस्कृत–अंगरेजी–कोषः, १९७९ सं० पृ० २०१,
१३. कालिदासः, रघुवंशम्, ५/२१,
१४. मल्लिनाथः, रघुवंशम्, ५/२१,
"वित्तस्य धनस्य चतस्रो दश च कोटीश्चतुर्दशकोटिर्मे मह्यमाहरानयेति विद्यापरिसङ्ख्यानुसारेणैवोक्तः" ।


❖ ❖ ❖

# वनवल्ली

*समीक्षकः - सुनील कुमार प्रधानः*

काव्यसङ्ग्रहः—वनवल्ली, कविः— डॉ० रवीन्द्र कुमार पण्डा, प्रकाशकः लॉयन्स क्लब ऑफ् लालबाग, लॉयन साहिब सिंह मोदी, 18, ग्रीन पार्क सोसायटी, मकरपुरा रोड, बड़ौदा—390010, प्रकाशनवर्षम्—1996, पृष्ठानि—36, मूल्यम्—20/— रूप्यकाणि।

आधुनिककाव्यरचयितृषु स्वनामधन्यः डॉ० रवीन्द्रकुमारपण्डा महोदयस्य वनवल्लीं (काव्यसङ्ग्रहं) वीक्ष्य सुतरां मोदमनुभवत्ययं जनः। अस्मिन् कवितासङ्ग्रहे जीवनदर्शनस्य सहजपक्षं कविना उद्घाटितम्। वनलताव्याजेन 'तेन व्यक्तेन भुञ्जीथाः' इत्युपनिषत्सूक्तिम् आचरन्तः इमे कविहृदयाः प्रतिकवितायां जीवनस्य शाश्वतसत्यं निरूपयन्ति। इह हि नूतनकाव्यकलाशिल्पस्य चारुता दरीदृश्यते। छन्दसा विना काव्यस्य अस्तित्व न इति वदन्ति बुधाः परं तु अस्मिन् प्रयोगवादिकाव्ययुगे पण्डामहोदयस्य काव्यप्रयोगः तन्नाम मुक्तच्छन्दसा अपि प्रकृतभावरक्षणं तथा च नैसर्गिकी रागात्मकता अतीव श्लाघ्या वर्तते।

प्राकृतिकोपादानैः आत्मज्ञानस्य प्रस्तुतिः एव अस्याः वनवल्ल्याः मूलस्वरः। विषयवैविध्येन संवलितेयं वनवल्ली माधुर्यपूर्णपदविन्यासैः मानवजीवनमनुशास्ति। 'श्रमिक' कवितामुखेन कविः श्रमस्य उपादेयता कोमलकान्तपदावल्या वर्णयति—

'न विश्वासः भाग्ये
न च भगवति ।
यद् प्राप्नोमि जीवने यदा
सर्वस्य मूले श्रमशक्तिः ।
नाराधयामि कमपि देवं
श्रमः मम आराध्यः ।'

प्रसादगुणोपेता इयं वनवल्ली निर्विचिकित्सया स्वकीयैः उपादानैः सहृदयान् मोदयति। अनुप्रासच्छटा प्रतिपदं चित्तं हरति। इतरे च उपमादयः अलङ्काराः अपि काव्योत्कर्षहेतवः किन्तु मुद्रणदोषाः काव्यत्वमपकुर्वन्ति। क्वचित् सन्धिदोषाः क्लिष्टपदपदार्थादिप्रयोगाः मूलभावस्य अवबोधने बाधा—मुपस्थापयन्ति तथापि आगामिकाले कविः अनित्यदोषानपि वारयित्वा सुष्टुकाव्य—सङ्ग्रहैः गीर्वाणवाणीं भूषयिष्यतीति कामये। ❖



# फार्म-४

**नियमः ८ द्रष्टव्यः**

1. प्रकाशनस्थानम् : आरा (विहारः)
2. प्रकाशनस्य अवधिः : अर्धवार्षिकम्
3. मुद्रकस्य नाम : डॉ० गोपबन्धु मिश्रः
   किमसौ भारतस्य नागरिकः ? : एवम्
   सङ्केतः : संस्कृतप्रसारपरिषद्, आरा
4. प्रकाशकस्य नाम : डॉ० गोपबन्धु मिश्रः
   किमसौ भारतस्य नागरिकः ? : एवम्
   सङ्केतः : संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः)
5. सम्पादकस्य नाम : डॉ० गोपबन्धु मिश्रः
   किमसौ भारतस्य नागरिकः ? : एवम्
   सङ्केतः : संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः)
6. तेषां जनानां नामानि सङ्केताश्च ये समाचारपत्रस्य स्वामिनः स्युः तथा च ये समस्तव्ययस्य एकप्रतिशतात् अधिकस्य अंशग्राहकाः स्युः : संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः)

अहं गोपबन्धु मिश्रः एतद्द्वारा उद्घोषयामि यत् मम अधिकतमस्य बोधस्य विश्वासस्य च अनुसारेण उपरि प्रदत्तं विवरणं सत्यम् अस्ति ।

ह० गोपबन्धु मिश्रः
सम्पादकः